DPN 6445

Title : भगवद्गीता / BHAGAVADGĪTĀ

Run. No. 7170

Cat. No. 62

Micro. No.

Subject yogaśāstra

Religion : Hindu / Bauddha

Language : Skt. / New. / Nep. / Skt.- New. / Maith.- New. / New.- Nep. /

Size in cms. 17.×9.5

Folios 89 missing 1-3

Lines (in a page) 7

Compl. / Incompl.

Chapt. / act /

Author / translator

Scribe / donor

Date: NS / SS / VS / KS 1923

Ruler / place

Script : New. / Dev. / Bhuj. / Ran. /

Illus. :

Material : palmleaf / paper / thyasaphu /

Condition : fine / damaged by worms, rats, water / one side yellow

Beginning, colophon, post-colophon :

1. Fol. 91 a-b : इति श्रीभगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां ~~योगशास्त्रे श्रीकृष्णार्जुनसंवादे~~ मोक्षसंन्यासयोगो नामाष्टादशोऽध्यायः ॥१९८॥

2. इति श्री गीतामाहात्म्यं शुभम् ॥ सम्वत् १९२३ साल मिति माघशुदी १४ रोज ९ शुभम् ॥

करोतिवाचालंपंगुंलंघयतेगिरिं॥यत्कृपातमहंवंदे॰
परमानंदमाधवं॥८॥यंब्रह्मावरुणेंद्ररुद्रमरुतस्तु
वंतिदिव्यैस्तवैर्वेदैःसांगपदक्रमोपनिषदैर्गायंति
यंसामगाः॥ध्यानावस्थिततद्गतेनमनसापश्यंतियं॰
योगिनोयस्यांतंनविदुःसुरासुरगणादेवायतस्मैनम
॥९॥इतिन्यासः॥ ॥धृतराष्ट्रउवाच॥धर्मक्षेत्रेकुरु
क्षेत्रेसमवेतायुयुत्सवः॥मामकाःपांडवाश्चैवकिम

भाग ६२

कुर्वतसंजय॥१॥ ॥संजयउवाच॥दृष्ट्वातुपांडवा
नीकंव्यूढंदुर्योधनस्तदा॥आचार्यमुपसंगम्यराजावचन
मब्रवीत्॥२॥पश्यैतांपांडुपुत्राणामाचार्यमहतींचमू
॥व्यूढांद्रुपदपुत्रेणतवशिष्येणधीमता॥३॥अत्रशूरा
महेष्वासाभीमार्जुनसमायुधि॥युयुधानोविराटश्चद्रुप
दश्चमहारथः॥४॥धृष्टकेतुश्चेकितानःकाशिराजश्चवी
र्यवान्॥पुरुजित्कुंतिभोजश्चशैव्यश्चनरपुंगवः॥५॥

युधामन्युश्चविक्रांतउत्तमौजाश्चवीर्यवान्॥सौभद्रोद्रौपदे
याश्चसर्वएवमहारथाः॥६॥अस्माकंतुविशिष्टायेतान्निबोध
द्विजोत्तम॥नायकाममसैन्यस्यसंज्ञार्थंतान्ब्रवीमिते॥७॥भवा
न्भीष्मश्चकर्णश्चकृपश्चसमितिंजयः॥अश्वत्थामाविकर्ण
श्चसौमदत्तिस्तथैवच॥८॥अन्येचबहवःशूरामदर्थेत्यक्त
जीविताः॥नानाशस्त्रप्रहरणाःसर्वेयुद्धविशारदाः॥९॥अप
र्याप्तंतदस्माकंबलंभीष्माभिरक्षितं॥पर्याप्तंत्विदमेतेषांब

सौभीमाभिरक्षितं ॥ १० ॥ श्वयनेषुचसर्वेषुयथाभागमवस्थि
ताः ॥ भीष्ममेवाभिरक्षंतुभवंतः सर्वएवहि ॥ ११ ॥ तस्यसंजय
हर्षंकुरुवृद्धः पितामहः ॥ सिंहनादंविनद्योच्चैः शंखंदध्मौ
प्रतापवान् ॥ १२ ॥ ततः शंखाश्चभेर्य्यश्चपणवानकगोमुखाः ॥
सहसैवाभ्यहन्यंतसशब्दस्तुमुलोभवत् ॥ १३ ॥ ततः श्वेतैर्हयै
र्युक्तेमहतिस्यंदनेस्थितौ ॥ माधवः पाण्डवश्चैव दिव्यौशंखौ
प्रदध्मतुः ॥ १४ ॥ पांचजन्यंहृषीकेशोदेवदत्तंधनंजयः ॥ पौ

ण्ड्रंदध्मौमहाशंखंभीमकर्मावृकोदरः ॥ १५ ॥ अनंतविजयं
राजाकुंतीपुत्रोयुधिष्ठिरः ॥ नकुलःसहदेवश्चसुघोषम
णिपुष्पकौ ॥ १६ ॥ काश्यश्चपरमेष्वासःशिखंडीचमहा
रथः ॥ धृष्टद्युम्नोविराटश्चसात्यकिश्चापराजितः ॥ १७ ॥ द्रु
पदोद्रौपदेयाश्चसर्वशः पृथिवीपते ॥ सौभद्रश्चमहाबा
हुः शंखान्दध्मुः पृथक्पृथक् ॥ १८ ॥ सघोषोधार्त्तराष्ट्राणां
हृदयानिव्यदारयत् ॥ नभश्चपृथिवींचैवतुमुलोव्यनु

नादयन् ॥ १९ ॥ अथव्यवस्थितान्दृष्ट्वाधार्त्तराष्ट्रान्कपिध्व
जः ॥ प्रवृत्तेशस्त्रसंपाते धनुरुद्यम्यपाण्डवः ॥ २० ॥ हृषी
केशंतदावाक्यमिदमाहमहीपते ॥ अर्जुनउवाच ॥ से
नयोरुभयोर्मध्येरथंस्थापयमेच्युत ॥ २१ ॥ यावदेता
न्निरीक्षेहंयोद्धुकामानवस्थितान् ॥ कैर्मयासहयोद्ध
व्यमस्मिन्रणसमुद्यमे ॥ २२ ॥ योत्स्यमानानवेक्षेहंय
एतेऽत्रसमागताः ॥ धार्त्तराष्ट्रस्यदुर्बुद्धेर्युद्धेप्रियचि

कीर्षवः ॥ २३ ॥ संजयउवाच ॥ एवमुक्तोहृषीकेशोगुडा
केशेनभारत ॥ सेनयोरुभयोर्मध्येस्थापयित्वारथोत्त
मं ॥ २४ ॥ भीष्मद्रोणप्रमुखतःसर्वेषांचमहीक्षितां ॥ उवा
चपार्थपश्यैतान्समवेतान्कुरूनिति ॥ २५ ॥ तत्रापश्यत्स्थि
तान्पार्थः पितॄनथपितामहान् ॥ आचार्यान्मातुलान्भ्रातॄ
न्पुत्रान्पौत्रान्सखींस्तथा ॥ २६ ॥ श्वशुरान्सुहृदश्चैवसेनयो
रुभयोरपि ॥ तान्समीक्ष्यसकौन्तेयःसर्वान्बंधूनवस्थिता

नू॥२७॥ कृपयापरयाविष्टोविषीदन्निदमब्रवीत्॥स्व
जुनउवाच॥दृष्ट्वेमंस्वजनंकृष्णयुयुत्सुंसमुपस्थितं॥२
८॥सीदंतिममगात्राणिमुखंचपरिशुष्यति॥वेपथुश्च
शरीरेमेरोमहर्षश्चजायते॥२९॥गांडीवंस्रंसतेह
स्तात्त्वक्चैवपरिदह्यते॥नचशक्नोम्यवस्थातुभ्रमती
वचमेमनः॥३०॥निमित्तानिचपश्यामिविपरीतानि
केशव॥नचश्रेयोनुपश्यामिहत्वास्वजनमाहवे॥३१

एम
॥७॥

॥नकांक्षेविजयंकृष्णनचराज्यंसुखानिच॥किंनोरा
ज्येनगोविंदकिंभोगैर्जीवितेनवा॥३२॥येषामर्थेकां
क्षितंनोराज्यंभोगाःसुखानिच॥तइमेवस्थितायुद्धे
प्राणांस्त्यक्त्वाधनानिच॥३३॥आचार्याःपितरःपुत्रा
स्तथैवचपितामहाः॥मातुलाःश्वशुराःपौत्राःश्याला
:संबंधिनस्तथा॥३४॥एतान्नहंतुमिच्छामिघ्नतोपिमधु
सूदन॥अपित्रैलोक्यराज्यस्यहेतोःकिंनुमहीकृते॥३

५॥निहत्यधार्त्तराष्ट्रान्नः काप्रीतिःस्याज्जनार्दन॥पापमे
वाश्रयेदस्मान्हत्वैतानाततायिनः॥३६॥तस्मान्नार्हावय
यंहंतुंधार्त्तराष्ट्रान्सबांधवान्॥स्वजनंहिकथंहत्वासु
खिनःस्याममाधव॥३७॥यद्यप्येतेनपश्यंतिलोभो
पहतचेतसः॥कुलक्षयकृतंदोषंमित्रद्रोहेचपात
कं॥३८॥कथंनज्ञेयमस्माभिःपापादस्मान्निवर्त्तितुं॥कु
लक्षयकृतंदोषंप्रपश्यद्भिर्जनार्दन॥३९॥कुलक्षये

रम
॥८॥

प्रणश्यंतिकुलधर्माःसनातनाः॥धर्मेनष्टेकुलंकृत्स्नमध
र्मोभिभवत्युत॥४०॥अधर्माभिभवात्कृष्णप्रदुष्यंतिकु
लस्त्रियः॥स्त्रीषुदुष्टासुवार्ष्णेयजायतेवर्णसंकरः॥
४१॥संकरोनरकायैवकुलघ्नानांकुलस्यच॥पतंति
पितरोह्येषांलुप्तपिंडोदक क्रियाः॥४२॥दोषैरेतैःकु
लघ्नानांवर्णसंकरकारकैः॥उत्साद्यंतेजातिधर्माःकुल
धर्माश्चशाश्वताः॥४३॥उत्सन्नकुलधर्माणांमनुष्या

णांजनार्दन॥ नरकेनियतंवासोभवतीत्यनुशुश्रुम॥ ४४॥
अहोबतमहत्पापंकर्तुंव्यवसितावयं॥ यद्राज्यसुखलोभे
नहंतुंस्वजनमुद्यताः॥ ४५॥ यदिमामप्रतीकारमशस्त्रंशस्त्र
पाणयः॥ धार्त्तराष्ट्रारणेहन्युस्तन्मेक्षेमतरंभवेत्॥
४६॥ संजयउवाच॥ एवमुक्त्वार्जुनःसंख्येरथोपस्थउ
पाविशत्॥ विसृज्यसशरंचापंशोकसंविग्नमानसः॥
४७॥ ॥इतिश्रीभगवद्गीतासूपनिषत्सुब्रह्मविद्यायां॥

राम
॥ ७ ॥

योगशास्त्रेश्रीकृष्णार्जुनसंवादेअर्जुनविषादोनामप्रथमे
ध्यायः॥ १॥ ॥संजयउवाच॥ तंतथाकृपयाविष्टमश्रु
पूर्णाकुलेक्षणं॥ विषीदंतमिदंवाक्यमुवाचमधुसूदन
॥ १॥ श्रीभगवानुवाच॥ कुतस्त्वाकश्मलमिदंविषमेस
मुपस्थितं॥ अनार्य्यजुष्टमस्वर्ग्यमकीर्त्तिकरमर्जुन॥ २॥
क्लैव्यंमास्मगमःपार्थनैतत्त्वय्युपपद्यते॥ क्षुद्रंहृदयदौ
र्बल्यंत्यक्त्वोत्तिष्ठपरंतप॥ ३॥ अर्जुनउवाच॥ कथंभीष्म

मरुंमंत्वोजोरांत्वमधुसूदन॥६॥युधिः प्रतियोत्स्यामियूजा
र्होवरिसूदन॥४॥गुरूनहत्वाहिमहानुभावान्श्रेयोभोक्तुं
भैक्ष्यमपीहलोके॥हत्वार्थकामांस्तुगुरूनिहैवभुंजीयभो
गान्रुधिरप्रदिग्धान्॥५॥नचैतद्विद्मःकतरन्नोगरीयो
यद्वाजयेमयदिवानोजयेयुः॥यानेवहत्वान्नजीवि
तामस्तेवस्थिताःप्रमुखेधार्त्तराष्ट्राः॥६॥कार्पण्यदो॰
योपहतस्वभावःपृच्छामित्वांधर्मसंमूढचेताः॥यच्छे

राम
॥२०॥

यःस्यान्निश्चितंब्रूहितन्मेशिष्यस्तेहंशाधिमांत्वांप्रपन्नं
॥७॥नहिप्रपश्यामिममापनुद्याद्यच्छोकमुच्छोषणा
मिन्द्रियाणां॥अवाप्यभूमावसपत्नमृद्धंराज्यंसुराणा
मपिचाधिपत्यं॥८॥संजयउवाच॥एवमुक्काहृषीके
शंगुडाकेशःपरंतप॥नयोत्स्यइतिगोविंदमुक्कातूष्णी
बभूवह॥९॥तमुवाचहृषीकेशःप्रहसन्निवभारत॥
सेनयोरुभयोर्मध्येविषीदंतमिदंवचः॥१०॥श्रीभगव

उवाच॥अशोच्यानन्वशोचस्त्वंप्रज्ञावादांश्चभाषसे॥
गतासूनगतासूंश्चनानुशोचंतिपण्डिताः॥११॥नत्वेवाहं
जातुनासंनत्वंनेमेजनाधिपाः॥नचैवनभविष्यामःसर्वे
वयमतःपरं॥१२॥देहिनोस्मिन्यथादेहेकौमारंयौव
नंजरा॥तथादेहांतरप्राप्तिर्धीरस्तत्रनमुह्यति॥१३॥
मात्रास्पर्शास्तुकौंतेयशीतोष्णसुखदुःखदाः॥आगमा
पायिनोनित्यास्तांस्तितिक्षस्वभारत॥१४॥यंहिनव्यथयं

तेतेपुरुषंपुरुषर्षभ॥समदुःखसुखंधीरंसोमृतत्वा
यकल्पते॥१५॥नासतोविद्यतेभावोनाभावोविद्यतेस
तः॥उभयोरपिदृष्टोन्तस्त्वनयोस्तत्वदर्शिभिः॥१६॥
अविनाशितुतद्विद्धियेनसर्वमिदंततं॥विनाशमव्य
यस्यास्यनकश्चित्कर्तुमर्हति॥१७॥अंतवंतइमेदेहा
नित्यस्योक्ताःशरीरिणः॥अनाशिनोप्रमेयस्यतस्माद्यु
ध्यस्वभारत॥१८॥यएनंवेत्तिहंतारंयश्चैनंमन्यतेहतं

॥उभौतौनविजानीतोनायंहंतिनहन्यते ॥१९॥नजायते
म्रियतेवाकदाचिन्नायंभूत्वाभवितावानभूयः॥अजो
नित्यःशाश्वतोयंपुराणोनहन्यतेहन्यमानेशरीरे ॥२०
वेदाविनाशिनंनित्यंयएनमजमव्ययं॥कथंसपुरुषः
पार्थकंघातयतिहंतिकं ॥२१॥वासांसिजीर्णानियथावि
हायनवानिगृह्णातिनरोपराणि॥तथाशरीराणिवि
हायजीर्णान्यन्यानिसंयातिनवानिदेही॥२२॥नैनंछिंद

॥१३॥

दंतिशस्त्राणिनैनंदहतिपावकः॥नचैनंक्लेदयंत्यापो
नशोषयतिमारुतः॥२३॥अच्छेद्योयमदाह्योयमक्लेद्यो
शोष्यएवच॥नित्यःसर्वगतस्थाणुरचलोयंसनातनः॥
२४॥अव्यक्तोयमचिंत्योयमविकार्योयमुच्यते॥तस्मादे
वंविदित्वैनंनानुशोचितुमर्हसि॥२५॥अथचैनंनित्यजा
तंनित्यंवामन्यसेमृतं॥तथापित्वंमहाबाहोनैवंशोचितु
महसि॥२६॥जातस्यहिध्रुवोमृत्युर्ध्रुवंजन्ममृतस्यच॥

तस्मादपरिहार्येऽर्थेनत्वंशोचितुमर्हसि ॥ २७ ॥ अव्यक्तादी
निभूतानिव्यक्तमध्यानिभारत ॥ अव्यक्तनिधनान्येवतत्र
कापरिदेवना ॥ २८ ॥ आश्चर्यवत्पश्यतिकश्चिदेनमा
श्चर्यवद्वदतितथैवचान्यः ॥ आश्चर्यवच्चैनमन्यःशृणो
तिश्रुत्वाप्येनंवेदनचैवकश्चित् ॥ २९ ॥ देहीनित्यमव
ध्योयंदेहेसर्वस्यभारत ॥ तस्मात्सर्वाणिभूतानिनत्वं
शोचितुमर्हसि ॥ ३० ॥ स्वधर्ममपिचावेक्ष्यनविकंपितु

महसि ॥ धर्म्याद्धियुद्धाच्छ्रेयोन्यत्क्षत्रियस्यनविद्यते ॥
३१ ॥ यदृच्छयाचोपपन्नंस्वर्गद्वारमपावृतं ॥ सुखिनः क्ष
त्रियाःपार्थलभंतेयुद्धमीदृशं ॥ ३२ ॥ अथचेत्वमिमंधर्म्य
संग्रामंनकरिष्यसि ॥ ततःस्वधर्मंकीर्तिंचहित्वापापम
वाप्स्यसि ॥ ३३ ॥ अकीर्तिंचापिभूतानिकथयिष्यंतितेऽ
व्ययां ॥ संभावितस्यचाकीर्तिर्मरणादतिरिच्यते ॥ ३४ ॥
भयाद्रणादुपरतंमंस्यंतेत्वांमहारथाः ॥ येषांचत्वंब

हमतोभूत्वायास्यसिलाघवं॥३५॥अवाच्यवादांश्चबहू
न्वदिष्यंतितवाहिताः॥निंदंतस्तवसामर्थ्यंततोदुःखत
रंनुकिं॥३६॥हतोवाप्राप्स्यसिस्वर्गंजित्वावाभोक्ष्यसेमहीं
॥तस्मादुत्तिष्ठकौन्तेययुद्धायकृतनिश्चयः॥३७॥सुखदु
खेसमेकृत्वालाभालाभौजयाजयौ॥ततोयुद्धाययुज्यस्वनैवं
पापमवाप्स्यसि॥३८॥एषातेभिहितासांख्येबुद्धियोगित्वि
मांशृणु॥बुद्ध्यायुक्तोययापार्थकर्मबंधंप्रहास्यसि॥३९॥

नेहाभिक्रमनाशोस्तिप्रत्यवायोनविद्यते॥स्वल्पमप्यस्यध
र्मस्यत्रायतेमहतोभयात्॥४०॥व्यवसायात्मिकाबुद्धिरेकेः
हकुरुनंदन॥बहुशाखाह्यनंताश्चबुद्धयोव्यवसायिनाम्
॥४१॥यामिमांपुष्पितांवाचंप्रवदंत्यविपश्चितः॥वेदवा
दरताःपार्थनान्यदस्तीतिवादिनः॥४२॥कामात्मानःस्वर्गप
राजन्मकर्मफलप्रदां॥क्रियाविशेषबहुलांभोगैश्वर्यगं
तिंप्रति॥४३॥भोगैश्वर्यप्रसक्तानांतयापहृतचेतसां॥व्य

वसायात्मिकाबुद्धिःसमाधौनविधीयते ॥४४॥त्रैगुण्यविष
यावेदानिस्त्रैगुण्योभवार्जुन॥निर्द्वन्द्वोनित्यसत्वस्थोनिर्यो
गक्षेमआत्मवान् ॥४५॥यावानर्थउदपानेसर्वतःसंप्लुतो
दके॥तावान्सर्वेषुवेदेषुब्राह्मणस्यविजानतः ॥४६॥क
र्मण्येवाधिकारस्तेमाफलेषुकदाचन॥माकर्मफलहेतु
र्भूर्मातेसंगोस्त्वकर्मणि ॥४७॥योगस्थःकुरुकर्माणिसंग
त्यक्त्वाधनंजय॥सिद्ध्यसिद्ध्योःसमोभूत्वासमत्वंयोगउच्य

राम
॥१५॥

ते ॥४८॥दूरेह्यवरंकर्मबुद्धियोगाद्धनंजय॥बुद्धौशर
णमन्विच्छकृपणाःफलहेतवः ॥४९॥बुद्धियुक्तोजहातीह
उभेसुकृतदुष्कृते॥तस्माद्योगाययुज्यस्वयोगःकर्मसु
कौशलं ॥५०॥कर्मजंबुद्धियुक्ताहिफलंत्यक्त्वामनीषिणः
जन्मबंधविनिर्मुक्ताःपदंगच्छन्त्यनामयं ॥५१॥यदाते मो
हकलिलंबुद्धिर्व्यतितरिष्यति॥तदागंतासिनिर्वेदंश्रोत
व्यस्यश्रुतस्यच ॥५२॥श्रुतिविप्रतिपन्नातेयदास्थास्यति

0 cmts. 5 10 15

निश्चला॥ समाधावचलाबुद्धिस्तदायोगमवाप्स्यसि॥५३॥
अर्जुनउवाच॥स्थितप्रज्ञस्यकाभाषासमाधिस्थस्यकेशव
॥स्थितधीःकिंप्रभाषेतकिमासीतव्रजेतकिं॥५४॥श्रीभग
वानुवाच॥प्रजहातियदाकामान्सर्वान्पार्थमनोगतान्॥
श्रात्मन्येवात्मनातुष्टःस्थितप्रज्ञस्तदोच्यते॥५५॥दुःखेष्व
नुद्विग्नमनाःसुखेषुविगतस्पृहः॥वीतरागभयक्रोधः
स्थितधीर्मुनिरुच्यते॥५६॥यःसर्वत्रानभिस्नेहस्तत्तत्प्रा

प्यशुभाशुभं॥नाभिनंदतिनद्वेष्टितस्यप्रज्ञाप्रतिष्ठिता॥
५७॥यदासंहरतेचायंकूर्मोऽङ्गानीवसर्वशः॥इन्द्रियाणी
न्द्रियार्थेभ्यस्तस्यप्रज्ञाप्रतिष्ठिता॥५८॥विषयाविनिव
र्त्तन्तेनिराहारस्यदेहिनः॥रसवर्जंरसोप्यस्यपरंदृष्ट्वा
निवर्त्तते॥५९॥यततोह्यपिकौन्तेयपुरुषस्यविपश्च
श्चितः॥इन्द्रियाणिप्रमाथीनिहरंतिप्रसभंमनः॥
६०॥तानिसर्वाणिसंयम्ययुक्तआसीतमत्परः॥वशे

हियस्येन्द्रियाणिसर्वशःइन्द्रियार्थेभ्यस्तस्यप्रज्ञाप्रतिष्ठिता॥६१॥ध्यायतोविषयान्पुंसःसंगस्तेषूपजायते॥संगात्संजायतेकामःकामात्क्रोधोभिजायते॥६२॥क्रोधाद्भवतिसंमोहःसंमोहात्स्मृतिविभ्रमः॥स्मृतिभ्रंशाद्बुद्धिनाशोबुद्धिनाशात्प्रणश्यति॥६३॥रागद्वेषवियुक्तैस्तुविषयानिन्द्रियैश्चरन्॥आत्मवश्यैर्विधेयात्माप्रसादमधिगच्छति॥६४॥प्रसादेसर्वदुःखानांहानिरस्योपजायते॥प्रसन्नचेतसोह्याशुबुद्धिः प

र्यवतिष्ठते॥६५॥नास्तिबुद्धिरयुक्तस्यनचायुक्तस्यभावना॥नचाभावयतःशांतिरशांतस्यकुतःसुखं॥६६॥इन्द्रियाणांहिचरतांयन्मनोनुविधीयते॥तदस्यहरतिप्रज्ञांवायुर्नावमिवाम्भसि॥६७॥तस्माद्यस्यमहाबाहोनिगृहीतानिसर्वशः॥इन्द्रियाणीन्द्रियार्थेभ्यस्तस्यप्रज्ञाप्रतिष्ठिता॥६८॥यानिशासर्वभूतानांतस्यांजागर्तिसंयमी॥यस्यांजाग्रतिभूतानिसानिशापश्यतोमुनेः॥६९॥आपू

र्ममाणमचलप्रतिष्ठंसमुद्रमापःप्रविशंतियद्वत्तद्व
त्कामायंप्रविशंतिसर्वेसशांतिमाप्नोतिनकामकामी ॥७०
॥विहायकामान्यःसर्वान्पुमांश्चरतिनिस्पृहः॥निर्ममो
निरहंकारःसशांतिमधिगच्छति ॥७१॥एषाब्राह्मीस्थिति
:पार्थनैनांप्राप्यविमुह्यति॥स्थित्वास्यामंतकालेपिब्रह्म
निर्वाणमृच्छति ॥७२॥ ॥इतिश्रीभगवद्गीतासूपनि
षत्सुब्रह्मविद्यायांयोगशास्त्रेश्रीकृष्णार्जुनसंवादेसांख्य

योगोनामद्वितीयोध्यायः॥ २॥ ॥अर्जुनउवाच॥ज्यायसी
चेत्कर्म्मणस्तेमतावुद्धिर्जनार्दन॥तत्किंकर्म्मणिघोरेमांनि
योजयसिकेशव॥१॥व्यामिश्रेणेववाक्येनबुद्धिंमोहयसी
वमे॥तदेकंवदनिश्चित्ययेनश्रेयोहमाप्नुयां॥२॥श्रीभ
गवानुवाच॥लोकेस्मिन्द्विविधानिष्ठापुराप्रोक्तामयाना
घ॥ज्ञानयोगेनसांख्यानांकर्म्मयोगेनयोगिनां॥३॥नकर्म्म
णामनारम्भान्नैष्कर्म्यंपुरुषोश्नुते॥नचसंन्यसनादेवसि

ह्मिसमधिगच्छति॥४॥नहिकश्चित्क्षणमपिजातुतिष्ठत्य
कर्मकृत्॥कार्यतेह्यवशःकर्मसर्वःप्रकृतिजैर्गुणैः॥५॥
कर्मेंद्रियाणिसंयम्यय आस्तेमनसास्मरन्॥इंद्रियार्थां
ल्विमूढात्मामिथ्याचारःसउच्यते॥६॥यस्त्विंद्रियाणिमन
सानियम्यारभतेर्जुन॥कर्मेंद्रियैःकर्मयोगमसक्तःस
विशिष्यते॥७॥नियतंकुरुकर्मत्वंकर्मज्यायोह्यकर्म
णः॥शरीरयात्रापिचतेनप्रसिद्ध्येदकर्मणः॥८॥यज्ञा

र्थात्कर्मणोन्यत्रलोकोयंकर्मबंधनः॥तदर्थंकर्मकौंते
यमुक्तसंगःसमाचर॥९॥सहयज्ञाःप्रजाःसृष्ट्वापुरोवा
चप्रजापतिः॥अनेनप्रसविष्यध्वमेषवोस्त्विष्टकामधुक्॥
१०॥देवान्भावयतानेनतेदेवाभावयंतुवः॥परस्परंभावयं
तःश्रेयःपरमवाप्स्यथ॥११॥इष्टान्भोगान्हिवोदेवादास्यंतेय
ज्ञभाविताः॥तैर्दत्तानप्रदायैभ्योयोभुंक्तेस्तेनएवसः॥१२॥यज्ञ
शिष्टाशिनःसंतोमुच्यंतेसर्वकिल्बिषैः॥भुंजतेतेत्वघंपापा

येपचंत्यात्मकारणात्॥३॥अन्नाद्भवंतिभूतानिपर्जन्याद
न्नसंभवः॥यज्ञाद्भवतियर्जन्योयज्ञःकर्मसमुद्भवः॥१४॥
कर्मब्रह्मोद्भवंविद्धिब्रह्माक्षरसमुद्भवं॥तस्मात्सर्वगतं
ब्रह्मनित्यंयज्ञेप्रतिष्ठितं॥१५॥एवंप्रवर्तितंचक्रंनानु
वर्तयतीहयः॥अघायुरिन्द्रियारामोमोघंपार्थसजीव
तिं॥१६॥यस्त्वात्मरतिरेवस्यादात्मतृप्तश्चमानवः॥आत्म
न्येवचसंतुष्टस्तस्यकार्यंनविद्यते॥१७॥नैवतस्यकृते

नार्थोनाकृतेनेहकश्चन॥नचास्यसर्वभूतेषुकश्चिदर्थव्य
पाश्रयः॥१८॥तस्मादसक्तःसततंकार्य्यकर्म्मसमाचर॥अ
सक्तोह्याचरन्कर्मपरमाप्नोतिपूरुषः॥१९॥कर्म्मणैवहि
संसिद्धिमास्थितानजनकादयः॥लोकसंग्रहमेवापिसंप
श्यन्कर्तुमर्हसि॥२०॥यद्यदाचरतिश्रेष्ठस्तत्तदेवेतरोज
नः॥सयत्प्रमाणंकुरुतेलोकस्तदनुवर्त्तते॥२१॥नमेपार्थ
स्तिकर्त्तव्यंत्रिषुलोकेषुकिंचन॥नानवाप्तमवाप्तव्यंवर्त्तए

वचकर्म्मणि ॥२२॥ यदिह्यहंनवर्त्तेयंजातुकर्म्मण्यतंद्रित
॥मम वर्त्मानुवर्त्तन्तेमनुष्याः पार्थसर्वशः ॥२३॥ उत्सी
देयुरिमेलोकानकुर्यांकर्म्मचेदहं ॥ संकरस्यचकर्त्ता
स्यामुपहन्यामिमाः प्रजाः ॥२४॥ सक्ताः कर्म्मण्यविद्वांसो
यथाकुर्वंतिभारत ॥ कुर्य्याद्विद्वांस्तथासक्तश्चिकीर्षुर्लो
कसंग्रहं ॥२५॥ नबुद्धिभेदंजनयेदज्ञानंकर्मसंगिनां
॥जोषयेत्सर्वकर्माणिविद्वान्युक्तःसमाचरन् ॥२६॥

प्रकृतेः क्रियमाणानिगुणैः कर्म्माणिसर्वशः ॥ अहंकार
विमूढात्माकर्त्ताहमितिमन्यते ॥२७॥ तत्ववित्तुमहाबाहो
गुणकर्मविभागयोः ॥ गुणागुणेषुवर्त्तन्त इतिमत्वानस
ज्जते ॥२८॥ प्रकृतेर्गुणसंमूढाः सज्जंतेगुणकर्मसु ॥ ता
नकृत्स्नविदोमंदान्कृत्स्नविन्नविचालयेत ॥२९॥ मयि
सर्वाणिकर्माणिसंन्यस्याध्यात्मचेतसा ॥ निराशीर्निर्ममो
भूत्वायुध्यस्वविगतज्वरः ॥३०॥ येमेमतमिदंनित्यमनु

तिष्ठंतिमानवाः॥श्रद्धावंतोनसूयंतोमुच्यंतेतेपिकर्मभि
ः॥३१॥येत्वेतदभ्यसूयंतोनानुतिष्ठंतिमेमतं॥सर्वज्ञान
विमूढांस्तान्विद्धिनष्टानचेतसः॥३२॥सदृशंचेष्टतेस्व
स्याःप्रकृतेर्ज्ञानवानपि॥प्रकृतिंयांतिभूतानिनिग्रह
ःकिंकरिष्यति॥३३॥इंद्रियस्येंद्रियस्यार्थेरागद्वेषौव्यव
स्थितौ॥तयोर्नवमागच्छेत्तौह्यस्यपरिपंथिनौ॥३४॥श्रे
यान्स्वधर्मोविगुणःपरधर्मात्स्वनुष्ठितात्॥स्वध

र्मेनिधनंश्रेयःपरधर्मोभयावहः॥३५॥अर्जुनउवाच॥
अथकेनप्रयुक्तोयंपापंचरतिपूरुषः॥अनिच्छन्नपिवार्ष्ण
ेयबलादिवनियोजितः॥श्रीभगवानुवाच॥कामएषक्रो
धएषरजोगुणसमुद्भवः॥महाशनोमहापाप्माविद्ध्येन
मिहवैरिणं॥३७॥धूमेनाव्रियतेवह्निर्यथादर्शोमलेनच
॥यथोल्बेनावृतोगर्भस्तथातेनेदमावृतं॥३८॥आवृतंज्ञा
नमेतेनज्ञानिनोनित्यवैरिणा॥कामरूपेणकौंतेयदुःपू

रणानलेनच्च ॥३९॥ इन्द्रियाणिमनोबुद्धिरस्याधिष्ठानमु
च्यते ॥ एतैर्विमोहयत्येषज्ञानमावृत्यदेहिनं ॥४०॥ तस्मात्व
मिन्द्रियाण्यादौनियम्यभरतर्षभ ॥ पाप्मानंप्रजहिह्येनं ज्ञा
नविज्ञाननाशनं ॥४१॥ इन्द्रियाणिपराण्याहुरिन्द्रियेभ्यः प
रंमनः ॥ मनसस्तुपराबुद्धिर्योबुद्धेःपरतस्तुसः ॥४२॥ एवं
बुद्धेःपरंबुद्धासंस्तभ्यात्मानमात्मना ॥ जहिशत्रुंमहाबा
होकामरूपंदुरासदं ॥४३॥ ॥ इतिश्रीभगवद्गीतासु

पनिषत्सुब्रह्मविद्यायांयोगशास्त्रेश्रीकृष्णार्जुनसंवादेक
र्मयोगोनामचतुर्थोध्यायः ॥ ४ ॥ ॥ श्रीभगवानुवाच
॥ इमंविवस्वतेयोगंप्रोक्तवानहमव्ययं ॥ विवस्वान्मनवे
प्राहमनुरिक्ष्वाकवेऽब्रवीत् ॥ १ ॥ एवंपरंपराप्राप्तमिमं
राजर्षयोविदुः ॥ सकालेनेहमहतायोगोनष्टःपरंतप ॥२
सएवायंमयातेद्ययोगःप्रोक्तःपुरातनः ॥ भक्तोसिमेस
खाचेतिरहस्यंह्येतदुत्तमं ॥ ३ ॥ अर्जुनउवाच ॥ अपरंभः

भः गी ॥२४॥ वतोजन्मपरंजन्मविवस्वतः॥ कथमेतद्विजानीयांत्वमा
दौउक्तवानिति॥४॥ श्रीभगवानुवा च॥ बहूनिमेव्य
तीतानिजन्मानितवचार्जुन॥ तान्यहंवेदसर्वाणिनत्वंवे
त्थपरंतप॥५॥ अजोपिसन्नव्ययात्माभूतानामीश्वरो
पन्॥ प्रकृतिंस्वामधिष्ठायसंभवाम्यात्ममायया॥६॥य
दायदाहिधर्मस्यग्लानिर्भवतिभारत॥ अभ्युत्थानमध
र्मस्यतदात्मानंसृजाम्यहं॥७॥परित्राणायसाधूनांवि

रम ॥२४॥

नाशायचदुष्कृतां॥ धर्मसंस्थापनार्थायसंभवामियुगे
युगे॥८॥ जन्मकर्मचमेदिव्यमेवंयोवेत्तितत्वतः॥ त्यक्त्वा
देहंपुनर्जन्मनैतिमामेतिसोर्जुन॥९॥ वीतरागभयक्रोधा
मन्मयामामुपाश्रिताः॥ बहवोज्ञानतपसापूतामद्भावमा
गताः॥१०॥ येयथामांप्रपद्यंतेतांस्तथैवभजाम्यहं॥
ममवर्त्मानुवर्तन्तेमनुष्याः पार्थसर्वशः॥११॥ कांक्षंतः क
र्मणांसिद्धिंयजंतइहदेवताः॥ क्षिप्रंहिमानुषेलोके

सिद्धिर्भवतिकर्मजा॥१२॥चातुर्वर्ण्यंमयासृष्टंगुणकर्म
विभागशः॥तस्यकर्तारमपिमांविद्ध्यकर्तारमव्ययं॥
१३॥नमांकर्माणिलिंपंतिनमेकर्मफलेस्पृहा॥इतिमां
योभिजानातिकर्मभिर्नसबध्यते॥१४॥एवंज्ञात्वाकृतं
कर्मपूर्वैरपिमुमुक्षुभिः॥कुरुकर्मैवतस्मात्त्वंपूर्वैः पू
र्वतरंकृतं॥१५॥किंकर्मकिमकर्मेतिकवयोप्यत्रमोहि
ताः॥तत्तेकर्मप्रवक्ष्यामियज्ज्ञात्वामोक्ष्यसेऽशुभात्॥१६॥

रम
॥२५॥

॥कर्मणोह्यपिबोद्धव्यंबोद्धव्यंचविकर्मणः॥अकर्मण
श्चबोद्धव्यंगहनाकर्मणोगतिः॥१७॥कर्मण्यकर्मयः पश्
येदकर्मणिचकर्मयः॥सबुद्धिमान्मनुष्येषुसयुक्तःकृ
त्स्नकर्मकृत्॥१८॥यस्यसर्वेसमारंभाःकामसंकल्पवर्
र्जिताः॥ज्ञानाग्निदग्धकर्माणंतमाहुःपण्डितंबुधाः॥१९॥
त्यक्त्वाकर्मफलासंगंनित्यतृप्तोनिराश्रयः॥कर्मण्यभिप्र
वृत्तोपिनैवकिंचित्करोतिसः॥२०॥निराशीर्यतचित्तात्मा

भ:गी: ॥२६॥

सक्तसर्वपरिग्रहः॥शारीरंकेवलंकर्मकुर्वन्नाप्नोति
किल्बिषं॥२१॥यदृच्छालाभसंतुष्टोद्वन्द्वातीतोविमत्स
रः॥समःसिद्धावसिद्धौचकृत्वापिननिबध्यते॥२२॥
गतसंगस्यमुक्तस्यज्ञानावस्थितचेतसः॥यज्ञायाच
रतःकर्मसमग्रंप्रविलीयते॥२३॥ब्रह्मार्पणंब्रह्म
हविर्ब्रह्माग्नौब्रह्मणाहुतं॥ब्रह्मैवतेनगंतव्यंब्रह्मक
र्मसमाधिना॥२४॥दैवमेवापरेयज्ञंयोगिनःपर्युप

एम ॥२६॥

पासते॥ब्रह्माग्नावपरेयज्ञंयज्ञेनैवोपजुह्वति॥
२५॥श्रोत्रादीनीन्द्रियाण्यन्येसंयमाग्निषुजुह्वति॥
शब्दादीन्विषयान्यन्येइन्द्रियाग्निषुजुह्वति॥२६॥स
र्वाणीन्द्रियकर्माणिप्राणकर्माणिचापरे॥आत्मस
यमयोगाग्नौजुह्वतिज्ञानदीपिते॥२७॥द्रव्ययज्ञास्त
पोयज्ञायोगयज्ञास्तथापरे॥स्वाध्यायज्ञानयज्ञाश्चय
तयःसंशितव्रताः॥२८॥श्वपानेजुह्वतिप्राणंप्राणेऽ

यानेतथापरे॥प्राणापानगतीरुद्ध्वाप्राणायामपरा॰
यणाः॥२९॥अपरेनियताहाराःप्राणान्प्राणेषुजु॰
हुति॥सर्वेप्येतेयज्ञविदोयज्ञक्षपितकल्मषाः॥
३०॥यज्ञशिष्टामृतभुजोयांतिब्रह्मसनातनं॥नायं॰
लोकोस्त्ययज्ञस्यकुतोन्यःकुरुसत्तम॥३१॥एवंबहु
विधायज्ञावितताब्रह्मणोमुखे॥कर्मजान्विद्धितां
स्तान्वैनिबंज्ञात्वाविमोक्ष्यसे॥३२॥श्रेयान्द्रव्यमया

एम
॥२७॥

द्यज्ञाज्ञानयज्ञःपरंतप॥सर्वंकर्माखिलंपार्थज्ञा॰
नेपरिसमाप्यते॥३३॥तद्विद्धिप्रणिपातेनपरिप्र
श्नेनसेवया॥उपदेक्ष्यंतितेज्ञानंज्ञानिनस्तत्वदर्शि
नः॥३४॥यज्ज्ञात्वानपुनर्मोहमेवंयास्यसिपांडव॥
येनभूतान्यशेषेणद्रक्ष्यस्यात्मन्यथोमयि॥३५॥अ॰
पिचेदसिपापेभ्यःसर्वेभ्यःपापकृत्तमः॥सर्वंज्ञानप्ल॰
वेनैववृजिनंसंतरिष्यसि॥३६॥यथैधांसिसमिद्धो॰

भः गी ॥२८॥ निर्भस्मसात्कुरुतेऽर्जुन॥ज्ञानाग्निः सर्वकर्माणिभस्मसात्कुरुतेतथा॥३७॥नहिज्ञानेनसदृशंपवित्रमिहविद्यते॥तत्स्वयंयोगसंसिद्धःकालेनात्मनिविंदति॥३८॥श्रद्धावाँल्लभतेज्ञानंतत्परःसंयतेन्द्रियः॥ज्ञानंलब्ध्वापरांशांतिमचिरेणाधिगच्छति॥३९॥अज्ञश्चाश्रद्दधानश्चसंशयात्माविनश्यति॥नायंलोकोस्तिनपरोनसुखंसंशयात्मनः॥४०॥योगसंन्यस्तकर्माणं ज्ञानसंछिन्नसंशयं॥आत्मवंतंनकर्माणिनिबध्नंतिधनंजय॥४१॥तस्मादज्ञानसंभूतंहृत्स्थंज्ञानासिनात्मनः॥छित्वैनंसंशयंयोगमातिष्ठोत्तिष्ठभारत॥४२॥॥इतिश्रीमद्भगवद्गीतासूपनिषत्सुब्रह्मविद्यायांयोगशास्त्रेश्रीकृष्णार्जुनसंवादेकर्मयोगोनामचतुर्थोध्यायः॥४॥॥अर्जुनउवाच॥संन्यासंकर्मणांकृष्णपुनर्योगंचशंससि॥यच्छ्रेयएतयोरेकंतन्मे ब्रू

हिसुनिश्चितं ॥१॥ श्रीभगवानुवाच ॥ संन्यासः कर्म
योगश्चनिःश्रेयसकरावुभौ ॥ तयोस्तुकर्मसंन्यासात्कर्म
योगोविशिष्यते ॥२॥ ज्ञेयः सनित्यसंन्यासीयोनद्वेष्टि
नकांक्षति ॥ निर्द्वन्द्वोहिमहाबाहोसुखंबंधात्प्रमुच्यते
॥३॥ सांख्ययोगौपृथग्बालाः प्रवदंतिनपंडिताः ॥ ए
कमप्यास्थितःसम्यगुभयोर्विंदतेफलं ॥४॥ यत्सांख्यैः
प्राप्यतेस्थानंतद्योगैरपिगम्यते ॥ एकंसांख्यंचयोगं

भः गी
॥२॥

एम
॥२६॥

चयःपश्यतिसपश्यति ॥५॥ संन्यासस्तुमहाबाहोदुःख
माप्तुमयोगतः ॥ योगयुक्तोमुनिर्ब्रह्मनचिरेणाधिगछ
ति ॥६॥ योगयुक्तोविशुद्धात्माविजितात्माजितेंद्रियः ॥ सर्व
भूतात्मभूतात्माकुर्वन्नपिनलिप्यते ॥७॥ नैवकिंचित्करो
मीतियुक्तोमन्येततत्ववित् ॥ पश्यन्शृण्वन्स्पृशञ्जिघ्न
श्नन्गच्छन्स्वपन्श्वसन् ॥८॥ प्रलपन्विसृजन्गृह्णन्नुन्मिष
न्निमिषन्नपि ॥ इंद्रियाणींद्रियार्थेषुवर्त्तंत इतिधारयन् ॥९॥

ब्रह्मण्याधायकर्माणिसंगंत्यक्त्वाकरोतियः॥लिप्यतेनः
सपापेनपद्मपत्रमिवाम्भसा॥१०॥कायेनमनसाबुद्ध्या
केवलैरिन्द्रियैरपि॥योगिनःकर्मकुर्वंतिसंगंत्यक्त्वात्मशु
द्धये॥११॥युक्तः कर्मफलंत्यक्त्वाशांतिमाप्नोतिनैष्ठिकीं॥
अयुक्तःकामकारेणफलेसक्तोनिबध्यते॥१२॥सर्वकर्मा
णिमनसासंन्यस्यास्तेसुखंवशी॥नवद्वारेदेहीनैवंकुर्व
न्नकारयन्॥१३॥नकर्तृत्वंनकर्माणिलोकस्यसृजतिप्रभु

॥३०॥

॥नकर्मफलसंयोगंस्वभावस्तुप्रवर्त्तते॥१४॥नादत्तेक
स्यचित्पापंनचैवसुकृतंविभुः॥अज्ञानेनावृतंज्ञानंतेन
मुह्यंतिजंतवः॥१५॥ज्ञानेनतुतदज्ञानंयेषांनाशितमा
त्मनः॥तेषामादित्यवज्ज्ञानंप्रकाशयतितत्परं॥१६॥तद्बु
द्धयस्तदात्मानस्तन्निष्ठास्तत्परायणाः॥गच्छंत्यपुनरावृत्तिं
ज्ञाननिर्धूतकल्मषाः॥१७॥विद्याविनयसंपन्नेब्राह्म
णेगविहस्तिनी॥शुनिचैवश्वपाकेचपंडिताःसमदर्शि

र्विनः ॥१८॥ इहैवतैर्जितः सर्गोयेषांसाम्येस्थितंमनः ॥ नि
र्दोषंहिसमंब्रह्मतस्माद्ब्रह्मणिते स्थिताः ॥१९॥ नप्रहृष्य
त्प्रियंप्राप्यनोद्विजेत्प्राप्यचाप्रियं ॥ स्थिरबुद्धिरसंमूढोब्रह्म
विद्ब्रह्मणिस्थितः ॥२०॥ बाह्यस्पर्शेष्वसक्तात्माविंदत्यात्मनि
यत्सुखं ॥ सब्रह्मयोगयुक्तात्मासुखमक्षयमश्नुते ॥२१॥
येहिसंस्पर्शजाभोगादुःखयोनयएवते ॥ आद्यंतवंतःकौ
नेयतेषुरमतेबुधः ॥२२॥ शक्नोतीहैवयःसोढुंप्राक्शरी

रविमोक्षणात् ॥ कामक्रोधोद्भववेगंसयुक्तःससुखीन
रः ॥२३॥ योंतःसुखोन्तरारामस्तथांतर्ज्योतिरेवयः ॥ सयो
गीब्रह्मनिर्वाणंब्रह्मभूतोधिगच्छति ॥२४॥ लभंतेब्रह्मनि
र्वाणमृषयःक्षीणकल्मषाः ॥ छिन्नद्वैधायतात्मानःसर्व
भूतहितेरताः ॥२५॥ कामक्रोधवियुक्तानांयतीनांयतचे
तसां ॥ अभितोब्रह्मनिर्वाणंवर्त्तते विदितात्मनां ॥२६॥ स्प
र्शान्कृत्वाबहिर्बाह्यांश्चक्षुश्चैवांतरेभ्रुवोः ॥ प्राणापानौ

समौकृत्वानासाभ्यंतरचारिणौ॥२७॥यतेन्द्रियमनोबुद्धि
र्मुनिर्मोक्षपरायणः॥विगतेच्छाभयक्रोधोयःसदामु
क्तएवसः॥२८॥भोक्तारंयज्ञतपसांसर्वलोकमहेश्वरं॥
सुहृदंसर्वभूतानांज्ञात्वामांशांतिमृच्छति॥२९॥ ॥इ

श्रीभगवद्गीतासूपनिषत्सुब्रह्मविद्यायांयोगशास्त्रे॥ राम
श्रीकृष्णार्जुनसंवादे कर्मसंन्यासयोगोनाम पंचमोऽ ॥३२॥
ध्यायः॥५॥ ॥श्रीभगवानुवाच॥अनाश्रितःकर्मफलं॥

कार्यकर्मकरोतियः॥ससंन्यासीचयोगीचननिरग्निर्नचा
क्रियः॥१॥यंसंन्यासमितिप्राहुर्योगंतंविद्धिपांडव॥
नह्यसंन्यस्तसंकल्पोयोगीभवतिकश्चन॥२॥आरुरु
क्षोर्मुनेर्योगंकर्मकारणमुच्यते॥योगारूढस्यतस्यैव
शमःकारणमुच्यते॥३॥यदाहिनेंद्रियार्थेषुनकर्मस्व
नुषज्जते॥सर्वसंकल्पसंन्यासीयोगारूढस्तदुच्यते॥४
॥उद्धरेदात्मनात्मानंनात्मानमवसादयेत्॥आत्मैवह्या

मनोबंधुरात्मैव रिपुरात्मनः॥६॥बंधुरात्मात्मनस्तस्य
येनात्मैवात्मनाजितः॥अनात्मनस्तुशत्रुत्वेवर्तेतात्मैव
शत्रुवत्॥६॥जितात्मनः प्रशांतस्यपरमात्मासमाहि
तः॥शीतोष्णसुखदुःखेषुतथामानापमानयोः॥७॥
ज्ञानविज्ञानतृप्तात्माकूटस्थोविजितेंद्रियः॥युक्त इ
त्युच्यतेयोगीसमलोष्टाश्मकांचनः॥८॥सुहृन्मित्रार्युदा
सीनमध्यस्थद्वेष्यबंधुषु॥साधुष्वपिचपापेषुसमबु

राम
॥३३॥

द्धिर्विशिष्यते॥९॥योगीयुंजीतसततमात्मानंरहसि ६
स्थितः॥एकाकीयतचित्तात्मानिराशीरपरिग्रहः॥१०॥
शुचौदेशेप्रतिष्ठाप्यस्थिरमासनमात्मनः॥नात्युच्छ्रित
नातिनीचंचैलाजिनकुशोत्तरं॥११॥तत्रैकाग्रमनःकृ
त्वायतचित्तेंद्रियक्रियः॥उपविश्यासनेयुंज्याद्योगमा
त्मविशुद्धये॥१२॥समंकायशिरोग्रीवंधारयन्नचलं॥
स्थिरः॥संप्रेक्ष्यनासिकाग्रंस्वंदिशश्चानवलोकयन्॥१

३॥प्रशांतात्माविगतभीर्ब्रह्मचारिव्रतेस्थितः॥मनःसंय
म्यमच्चित्तोयुक्तआसीतमत्परः॥४॥युञ्जन्नेवंसदात्मानं
योगीनियतमानसः॥शांतिंनिर्वाणपरमांमत्संस्थामधि
गच्छति॥५॥नात्यश्नतस्तुयोगोस्तिनचैकांतमनश्न
तः॥नचातिस्वप्नशीलस्यजाग्रतोनैवचार्जुन॥६॥युक्ता
हारविहारस्ययुक्तचेष्टस्यकर्मसु॥युक्तस्वप्नावबोधस्ययो
गोभवतिदुःखहा॥७॥यदाविनियतंचित्तमात्मन्येवा

वतिष्ठते॥निस्पृहःसर्वकामेभ्योयुक्तइत्युच्यतेतदा॥८॥
यथादीपोनिवातस्थोनेङ्गतेसोपमास्मृता॥योगिनोयत
तचित्तस्ययुंजतोयोगमात्मनः॥९॥यत्रोपरमतेचित्तंनिरु
द्धंयोगसेवया॥यत्रचैवात्मनात्मानंपश्यन्नात्मनितुष्यति
॥१०॥सुखमात्यंतिकंयत्तद्बुद्धिग्राह्यमतीन्द्रियं॥वेत्ति
त्रनचैवायंस्थितश्चलतितत्त्वतः॥११॥यंलब्धाचापरंला
भंमन्यतेनाधिकंततः॥यस्मिन्स्थितोनदुःखेनगुरुणापि

विचाल्यते ॥२२॥ तंविद्याद्दुःखसंयोगंवियोगंयोगसंज्ञि
तं ॥ सनिश्चयेनयोक्तव्योयोगोनिर्विण्णचेतसा ॥२३॥ संक
ल्पप्रभवान्कामांस्त्यक्त्वासर्वानशेषतः ॥ मनसैवेन्द्रिय
ग्रामंविनियम्यसमंततः ॥२४॥ शनैःशनैरुपरमेद्बुद्ध्या ए॰म
तिगृहीतया ॥ आत्मसंस्थंमनःकृत्वानकिंचिदपिचिंतये ॥२५॥
त् ॥२५॥ यतोयतोनिश्चरतिमनश्चंचलमस्थिरं ॥ ततस्त
तोनियम्यैतदात्मन्येववशंनयेत् ॥२६॥ प्रशांतमनसं

ह्येनयोगीनंसुखमुत्तमं ॥ उपैतिशांतरजसंब्रह्मभूतम
कल्मषं ॥२७॥ युंजन्नेवंसदात्मानंयोगीविगतकल्मषः ॥
सुखेनब्रह्मसंस्पर्शमत्यंतसुखमश्नुते ॥२८॥ सर्वभूतस्थ
मात्मानंसर्वभूतानिचात्मनि ॥ ईक्षतेयोगयुक्तात्मासर्व
त्रसमदर्शनः ॥२९॥ योमांपश्यतिसर्वत्रसर्वंचमयिप
श्यति ॥ तस्याहंनप्रणश्यामिसचमेनप्रणश्यति ॥३०॥
सर्वभूतस्थितंयोमांभजत्येकत्वमास्थितः ॥ सर्वथावर्त

मानोपिसमोगीमपिवर्तते ॥३१॥आत्मौपम्येनसर्वत्र
संपश्यतियोर्जुन सुखंवायदिवादुःखसयोगीपरमो
मतः ॥३२॥अर्जुनउवाच ॥योयंयोगस्त्वयाप्रोक्तःसाम्ये
नमधुसूदन ॥एतस्याहंनपश्यामिचंचलत्वात्स्थितिं
स्थिरां ॥३३॥चंचलंहिमनःकृष्णप्रमाथिबलवद्दृढं
॥तस्याहंनिग्रहंमन्येवायोरिवसुदुष्करं ॥३४॥श्रीभ
गवानुवाच ॥असंशयंमहाबाहोमनोदुर्निग्रहंचलं

॥अभ्यासेनतुकौन्तेयवैराग्येणचगृह्यते ॥३५॥असं
यतात्मनायोगोदुःप्राप्यइतिमेमतिः ॥वश्यात्मनातुय
तताशक्योवाप्तुमुपायतः ॥३६॥अर्जुनउवाच ॥अय
तिःश्रद्धयोपेतोयोगाच्चलितमानसः ॥अप्राप्ययोग
संसिद्धिंकांगतिंकृष्णगच्छति ॥३७॥कच्चिन्नोभयवि
भ्रष्टश्छिन्नाभ्रमिवनश्यति ॥अप्रतिष्ठोमहाबाहो
विमूढोब्रह्मणःपथि ॥३८॥एतन्मेसंशयंकृष्णछेत्तु

महस्मोऽतः त्वदन्यः संचायस्यास्यछेत्तानहयुपप
द्यते ३९ श्रीभगवानुवाच पार्थनैवेहनामुत्रवि
नाशस्तस्यविद्यते नहिकल्याणकृत्कश्चिद्दुर्गतिं
तातगच्छति ४० प्राप्यपुण्यकृतांल्लोकानुषित्वाः
शाश्वतीःसमाः शुचीनांश्रीमतांगेहेयोगभ्रष्टोभि
जायते ४१ अथवायोगिनामेवकुलेभवतिधीमतां
एतद्धिदुर्लभतरंलोकेजन्मयदीदृशं ४२ तत्रतंबुद्धि

संयोगंलभतेपौर्वदेहिकं यततेचततोभूयः संसिद्धौकु
रुनन्दन ४३ पूर्वाभ्यासेनतेनैवह्रियतेह्यवशोपिसः
जिज्ञासुरपियोगस्यशब्दब्रह्मातिवर्तते ४४ प्रयत्ना द्य
तमानस्तुयोगीसंशुद्धकिल्बिषः अनेकजन्मसंसिद्धस्त
तोयातिपरांगतिं ४५ तपस्विभ्योधिकोयोगीज्ञानिभ्यो
पिमतोधिकः कर्मिभ्यश्चाधिकोयोगीतस्माद्योगीभवार्जुन
४६ योगिनामपिसर्वेषांमद्गतेनांतरात्मना श्रद्धावान्भ

जतेयोमांसमेयुक्तमोमतः॥४७॥ ॥इति॥ गव
सूप सुब्र योगां गास्त्रे ल्लार्जु
संवादे संय गोना ष्ठोध्यायः॥६॥ ॥श्री
भगवानुवाच॥ मय्यासक्तमनाःपार्थयोगंयुंजन्मदाश्रयः
॥असंशयंसमग्रंमांयथाज्ञास्यसितच्छृणु॥१॥ज्ञानंतेहंस
विज्ञानमिदंवक्ष्याम्यशेषतः॥यज्ज्ञात्वानेहभूयोन्यज्ज्ञातः
मवशिष्यते॥२॥मनुष्याणांसहस्रेषुकश्चिद्यततिसि

राम
॥२८॥

द्धये॥ यततामपिसिद्धानांकश्चिन्मांवेत्तितत्वतः॥३॥भूमि
रापोनलोवायुःखंमनोबुद्धिरेवच॥अहंकारइतीयंमे॥
भिन्नाप्रकृतिरष्टधा॥४॥अपरेयमितस्त्वन्यांप्रकृतिंवि
द्धिमेपराम्॥जीवभूतांमहाबाहोययेदंधार्यतेजगत्॥५॥
एतद्योनीनिभूतानिसर्वाणीत्युपधारय॥अहंकृत्स्नस्य
जगतःप्रभवःप्रलयस्तथा॥६॥मत्तःपरतरंनान्यत्किंचि
दस्तिधनंजय॥मयिसर्वमिदंप्रोतंसूत्रेमणिगणाइव॥

भः गी ॥२६॥

ऽरसोहमप्सुकौंतेयप्रभास्मिशशिसूर्ययोः॥प्रणवःसर्व
वेदेषुशब्दःखेपौरुषंनृषु॥८॥पुण्योगंधःपृथिव्यांचतेज
श्चास्मिविभावसौ॥जीवनंसर्वभूतेषुतपश्चास्मितपस्वि
षु॥९॥बीजंमांसर्वभूतानांविद्धिपार्थसनातनं॥बुद्धिर्बु
द्धिमतामस्मितेजस्तेजस्विनामहं॥१०॥बलंबलवतांचाहं रम
कामरागविवर्जितं॥धर्माविरुद्धोभूतेषुकामोस्मिभरत ॥२७॥
र्षभ॥११॥येचैवसात्विकाभावाराजसास्तामसाश्चये॥म

नएवेतिताविद्धिनत्वहंतेषुतेमयि॥१२॥त्रिभिर्गुणम
यैर्भावैरेभिःसर्वमिदंजगत्॥मोहितंनाभिजानातिमामे
भ्यःपरमव्ययं॥१३॥दैवीह्येषागुणमयीमममायादुर
त्यया॥मामेवयेप्रपद्यंतेमायामेतांतरंतिते॥१४॥नमां
दुष्कृतिनोमूढाःप्रपद्यंतेनराधमाः॥माययापहृतज्ञानं
आसुरंभावमाश्रिताः॥१५॥चतुर्विधाभजंतेमांजनाःसुकृ
तिनोर्जुन॥आर्तोजिज्ञासुरर्थार्थीज्ञानीचभरतर्षभ॥१६॥

तेषांज्ञानीनित्ययुक्तएकभक्तिर्विशिष्यते॥प्रियोहिज्ञा
निनोत्यर्थमहंसचसमप्रिय॥१७॥उदाराःसर्वएवैतेज्ञा
नीत्वात्मैवमेमतं॥आस्थितःसहियुक्तात्मामामेवानु
त्तमांगति॥१८॥बहूनांजन्मनामंतेज्ञानवान्मांप्रप
द्यते॥वासुदेवःसर्वमितिसमहात्मासुदुर्लभः॥१९॥का
मैस्तैस्तैर्हृतज्ञानाःप्रपद्यंतेन्यदेवताः॥तंतंनियममा
स्थायप्रकृत्यानियताःस्वया॥२०॥योयोयांयांतनुंभक्त

रास ॥४०॥

श्रद्धयार्चितुमिच्छति॥तस्यतस्याचलांश्रद्धांतामेवविद
धाम्यहं॥२१॥सतयाश्रद्धयायुक्तस्तस्याराधनमीहते॥ल
भतेचततःकामान्मयैवविहितान्हितान्॥२२॥अंतवत्तु
फलंतेषांतद्भवत्यल्पमेधसां॥देवान्देवयजोयांतिमद्भ
क्तायांतिमामपि॥२३॥अव्यक्तंव्यक्तिमापन्नंमन्यंतेमाम
बुद्धयः॥परंभावमजानंतोममाव्ययमनुत्तमं॥२४॥नाहं
प्रकाशःसर्वस्ययोगमायासमावृतः॥मूढोयंनाभिजानाः

त्रिलोकोमाभजमव्ययं॥२५॥वेदाहंसमतीतानिवर्त्तमा
नानिचार्जुन॥भविष्याणिचभूतानिमांतुवेदनकश्चन॥
॥२६॥इच्छाद्वेषसमुत्थेनद्वन्द्वमोहेनभारत॥सर्वाभू॰
तानिसंमोहंसर्गेयांतिपरंतप॥२७॥येषांत्वंतर्गतंपा॰
पंजनानांपुण्यकर्मणां॥तेद्वन्द्वमोहनिर्मुक्ताभजंतेमां
दृढव्रताः॥२८॥जरामरणामोक्षायमामाश्रित्ययतंति
येतेब्रह्मतद्विदुःकृत्स्नमध्यात्मंकर्म्मचाखिलं॥२९॥सा

धिभूताधिदैवंमांसाधियज्ञंचयेविदुः॥प्रयाणकालेपि
चमांतेविदुर्युक्तचेतसः॥३०॥इति श्रीभगवद्गीतासूप
निषत्सुब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे
ज्ञानयोगोनामसप्तमोध्यायः॥७॥ ॐतत्सदिति॥
किंतद्ब्रह्मकिमध्यात्मंकिंकर्म्मपुरुषोत्तम॥अधिभूतंच
किंप्रोक्तमधिदैवंकिमुच्यते॥१॥अधियज्ञकथंकोत्रदेहे
स्मिन्मधुसूदन॥प्रयाणकालेचकथंज्ञेयोसिनियतात्म

भगवद्गी ॥४२॥

मिः॥२॥श्रीभगवानुवाच॥अक्षरंपरमंब्रह्मस्वभावो
ध्यात्मउच्यते॥भूतभावोद्भवकरोविसर्गःकर्मसंज्ञित
ः॥३॥अधिभूतंक्षरोभावपुरुषश्चाधिदैवतं॥अधिय
ज्ञोहमेवात्रदेहेदेहभृतांवर॥४॥अंतकालेचमामेव
स्मरन्मुक्त्वाकलेवरं॥यःप्रयातिसमद्भावंयातिनास्त्य राम
त्रसंशयः॥५॥यंयंवापिस्मरन्भावंत्यजंत्यंतेकलेवरं॥ ॥४२॥
तंतमेवैतिकौंतेयसदातद्भावभावितः॥६॥तस्मात्स

वेषुकालेषुमामनुस्मरयुद्धच॥मय्यर्पितमनोबुद्धिर
र्मामेवैष्यस्यसंशयः॥७॥अभ्यासयोगयुक्तेनचेतसा
नान्यगामिना॥परमंपुरुषंदिव्यंयातिपार्थानुचिंत
यन्॥८॥कविंपुराणमनुशासितारमणोरणीयांस
मनुस्मरेद्यः॥सर्वस्यधातारमचिंत्यरूपमादित्यवर्ण
तमसःपरस्तात्॥९॥प्रयाणकालेमनसाचलेनभ
क्त्यायुक्तोयोगबलेनचैव॥भ्रुवोर्मध्येप्राणमावेश्य

सम्यक्समाधिरयुक्तमुपैतिहिवं ॥१०॥ यदक्षरंवेद
विदोवदंतिविशंतियद्यतयोवीतरागाः ॥यदिच्छंतो
ब्रह्मचर्यंचरंतितत्तेपदंसंग्रहेणप्रवक्ष्ये ॥११॥सर्वद्वा
राणिसंयम्यमनोहृदिनिरुध्यच ॥मूर्ध्न्याधायात्मनः
प्राणमास्थितोयोगधारणां ॥१२॥ओमित्येकाक्षरंब्र
ह्मव्याहरन्मामनुस्मरन् ॥यःप्रयातित्यजन्देहंसया
तियरमांगतिं ॥१३॥अनन्यचेताःसततंयोमांस्मरति

नित्यशः ॥तस्याहंसुलभःपार्थनित्ययुक्तस्ययोगिनः ॥
१४॥मामुपेत्यपुनर्जन्मदुःखालयमशाश्वतं ॥नाप्नुवं
तिमहात्मानःसंसिद्धिंपरमांगताः ॥१५॥आब्रह्मभु
वनाल्लोकाःपुनरावर्त्तिनोर्जुन ॥मामुपेत्यतुकौन्तेय
पुनर्जन्मनविद्यते ॥१६॥सहस्रयुगपर्य्यंतमहर्य्यद्ब्रह्म
णोविदुः ॥रात्रिंयुगसहस्रांतांतेहोरात्रविदोजनाः ॥
१७॥अव्यक्ताद्व्यक्तयःसर्वाःप्रभवन्त्यहरागमे ॥रात्र्या

गमेऽलीयंतेतत्रैवाव्यक्तसंज्ञिके ॥८॥ भूत्वाभूत्वाऽलीयते ॥ रात्रागमेऽवशः पार्थप्रभवत्यह
रागमे ॥९॥ परस्तस्मात्तुभावोन्योव्यक्तोव्यक्तात्सनातन
॥ यः सर्वेषुभूतेषुनश्यत्सुनविनश्यति ॥१०॥ अव्य
क्तोक्षरइत्युक्तस्तमाहुः परमांगतिं ॥ यंप्राप्यनिवर्त्तं
न्तेतद्धामपरमंमम ॥११॥ पुरुषः सपरः पार्थभक्त्या
लभ्यस्त्वनन्यया ॥ यस्यांतस्थानिभूतानियेनसर्वमिदं

रामा
॥४४॥

ततं ॥२२॥ यत्रकालेत्वनावृत्तिमावृत्तिंचैवयोगिनः ॥ अ
यातायांतितंकालंवक्ष्यामिभरतर्षभ ॥२३॥ अग्निर्जोति
रहःशुक्लः षण्मासाउत्तरायणं ॥ तत्रप्रयातागच्छंतिब्र
ह्मब्रह्मविदोजनाः ॥२४॥ धूमोरात्रिस्तथाकृष्णः षण्मासाद
क्षिणायनं ॥ तत्रचान्द्रमसंज्योतिर्योगीप्राप्यनिवर्त्तते ॥
२५॥ शुक्लकृष्णेगतीह्येतेजगतःशाश्वतेमते ॥ एकया
यात्यनावृत्तिमन्ययावर्त्ततेपुनः ॥२६॥ नैतेसृतीपार्थ

जानन्योगीसुशुचिरुक्षत्र ॥तस्मात्सर्वेषुकालेषुयोग
युक्तोभवार्जुन ॥२७॥वेदेषुयज्ञेषुतपस्सुचैवदानेषु
यत्पुण्यफलंप्रदिष्टं ॥अत्येतितत्सर्वमिदंविदित्वा
योगीपरंस्थानमुपैतिचाद्यं ॥२८॥ ॥इति श्रीभग
वद्गीतासूपनिषत्सुब्रह्मविद्यायांयोगशास्त्रे श्रीकृष्णा एम
र्जुनसंवादे राजगुह्ययोगोनामनवमोध्यायः ॥९॥ ॥४५॥
श्रीभगवानुवाच ॥इदंतेगुह्यतमंप्रवक्ष्याम्यनुसू

यवे ॥ज्ञानंविज्ञानसहितंयज्ज्ञात्वामोक्ष्यसेऽशुभात् ॥
१॥राजविद्याराजगुह्यंपवित्रमिदमुत्तमं ॥प्रत्यक्षा
वगमंधर्म्यंसुसुखंकर्तुमव्ययं ॥२॥अश्रद्दधानाःपुरु
षाधर्मस्यास्यपरंतप ॥अप्राप्यमांनिवर्त्तन्तेमृत्यु
संसारवर्त्मनि ॥३॥मयाततमिदंसर्वंजगदव्यक्तमू
र्त्तिना ॥मत्स्थानिसर्वभूतानिनचाहंतेष्ववस्थितः ॥४॥
नचमत्स्थानिभूतानिपश्यमेयोगमैश्वरं ॥भूतभृ

नचभूतस्थोममात्माभूतभावनः॥५॥यथाकाशस्थितो
नित्यंवायुःसर्वत्रगोमहान्॥तथासर्वाणिभूतानिमत्स्था
नीत्युपधारय॥६॥सर्वभूतानिकौन्तेयप्रकृतिंयांतिमां
मिकां॥कल्पक्षयेपुनस्तानिकल्पादौविसृजाम्यहं॥७॥
प्रकृतिंस्वामवष्टभ्यविसृजामिपुनःपुनः॥भूतग्राममि
मंकृत्स्नमवशंप्रकृतेर्वशात्॥८॥नचमांतानिकर्मा
णिनिबध्नंतिधनंजय॥उदासीनवदासीनमसक्तं ते

षुकर्मसु॥९॥मयाध्यक्षेणप्रकृतिःसूयतेसचराचरं॥
हेतुनानेनकौन्तेयजगद्विपरिवर्त्तते॥१०॥अवजानंति
मांमूढामानुषींतनुमाश्रितं॥परंभावमजानंतोममभू
तमहेश्वरं॥११॥मोघाशामोघकर्माणोमोघज्ञानाविचे
तसः॥राक्षसीमासुरीचैवप्रकृतिंमोहिनींश्रिताः॥१२॥
महात्मानस्तुमांपार्थदैवीप्रकृतिमाश्रिताः॥भजंत्यन
न्यमनसोज्ञात्वाभूतादिमव्ययं॥१३॥सततंकीर्त्तयंतोमां

यजंतश्चदृढव्रताः॥नमस्यंतश्चमांभक्त्यानित्ययुक्तोउपा
सते॥१४॥ज्ञानयज्ञेनचाप्यन्येयजंतोमामुपासते॥एक
त्वेनपृथक्त्वेनबहुधाविश्वतोमुखं॥१५॥अहंक्रतुरहं
यज्ञःस्वधाहमहमौषधं॥मंत्रोहमहमेवाज्यमहमग्नि
हंहुतं॥१६॥पितामहस्यजगतोमाताधातापितामहः॥वे
द्यंपवित्रमोंकारऋक्सामयजुरेवच॥१७॥गतिर्भर्त्ताप्रभ
ुःसाक्षीनिवासःशरणंसुहृत्॥प्रभवःप्रलयःस्थानं

निधानंबीजमव्ययं॥१८॥तपाम्यहमहंवर्षंनिगृह्णाम्यु
त्सृजामिच॥अमृतंचैवमृत्युश्चसदसच्चाहमर्जुन॥१९॥त्रै
विद्यामांसोमपाःपूतपापायज्ञैरिष्ट्वास्वर्गतिंप्रार्थयंते॥ते
पुण्यमासाद्यसुरेन्द्रलोकमश्नंतिदिव्यान्दिविदेवभोगान्
॥२०॥तेतंभुक्त्वास्वर्गलोकंविशालंक्षीणेपुण्येमर्त्यलोकं
विशंति॥एवंत्रयीधर्ममनुप्रपन्नागतागतंकामकामाल
भंते॥२१॥अनन्याश्चिंतयंतोमांयेजनाःपर्युपासते॥तेषां

नित्याभियुक्तानांयोगक्षेमंवहाम्यहं॥२२॥येप्यन्यदेवताभ
क्तायजंतेश्रद्धयान्विताः॥तेपिमामेवकौन्तेययजंत्यविधि
पूर्वकं॥२३॥अहंहिसर्वयज्ञानांभोक्ताचप्रभुरेवच॥न तु
मामभिजानंतितत्वेनातश्च्यवंतिते॥२४॥यांतिदेवव्रता
न्देवान्पितॄन्यांतिपितृव्रताः॥भूतानियांतिभूतेज्या यां
तिमद्याजिनोपिमां॥२५॥पत्रंपुष्पंफलंतोयंयोमेभक्त्या
प्रयच्छति॥तदहंभक्त्युपहृतमश्नामिप्रयतात्मनः॥२६॥

यत्करोषियदश्नासियज्जुहोषिददासियत्॥यत्तपस्य
सिकौन्तेयतत्कुरुष्वमदर्पणं॥२७॥शुभाशुभफलैरेवं
मोक्ष्यसेकर्मबंधनैः॥संन्यासयोगयुक्तात्माविमुक्तोमा
मुपैष्यसि॥२८॥समोहंसर्वभूतेषुनमेद्वेष्योस्तिनप्रि
यः॥येभजंतितुमांभक्त्यामयितेतेषुचाप्यहं॥२९॥अ
पिचेत्सुदुराचारोभजतेमामनन्यभाक्॥साधुरेवसमं
तव्यःसम्यग्व्यवसितोहिसः॥३०॥क्षिप्रंभवतिधर्मात्मा

भाश्वच्छोतिंनिगच्छति॥ कौंतेयप्रतिजानीहि नमेभक्तः
प्रणश्यति॥३१॥ मांहिपार्थव्यपाश्रित्यये पिस्युःपापयो
नयः॥ स्त्रियोवैश्यास्तथाशूद्रास्तेपियांतिपरांगतिं॥
३२॥किंपुनर्ब्राह्मणाःपुण्याभक्तारा जर्षयस्तथा॥अ
नित्यमसुखंलोकमिमंप्राप्यभजस्वमां॥३३॥मन्मना भव राम
मद्भक्तोमद्याजीमांनमस्कुरु॥मामेवैष्यसियुक्त्वैव ॥४६॥
मात्मानमत्पराय्यणः॥३४॥ ॥इति श्रीभगवद्गीतासू

यनिषत्सुब्रह्मविद्यायांयोगशास्त्रेश्रीकृष्णार्जुनसंवा
दे राजविद्याराजगुह्ययोगोनामनवमोध्यायः॥९॥ ॥
श्रीभगवानुवाच॥ भूयस्त्वमहावाहोशृणुमेपरमं
वचः॥यत्तेहंप्रीयमाणायवक्ष्यामिहितकाम्यया॥१॥
नमेविदुःसुरगणाःप्रभवंनमहर्षयः॥अहमादिर्हि
देवानांमहर्षीणांचसर्वशः॥२॥योमामजमनादिंचवे
त्तिलोकमहेश्वरं॥असंमूढःसमर्त्येषुसर्वपापैःप्रमु

यतेः॥३॥बुद्धिर्ज्ञानमसंमोहः क्षमासत्यंदमः शमः॥सुखंदुः
खंभवोभावोभयंचाभयमेवच॥४॥अहिंसासमतातुष्टि
स्तपोदानंयशोऽयशाः॥भवंतिभावभूतानांमत्त एवपृथ
ग्विधाः॥५॥महर्षयः सप्तपूर्वेचत्वारोमनवस्तथा॥म
द्भावामानसाजाताय्येषांलोकइमाः प्रजाः॥६॥एतांविः
भूतिंयोगंचममयोवेत्तितत्वतः॥सोविकंपेनयोगेनः
युज्यतेनात्रसंशयः॥७॥अहंसर्वस्यप्रभवोमत्तः सर्वं

रात्र
॥५०॥

प्रवर्त्तते॥इतिमत्वाभजंतेमांबुधाभावसमन्विताः॥
८॥मच्चित्तामद्गतप्राणाबोधयंतःपरस्परं॥कथयंतः
श्चमांनित्यंतुष्यंतिचरमंतिच॥९॥तेषांसततयुक्तानां
भजतांप्रीतिपूर्वकम्॥ददामिबुद्धियोगंतंयेनमामुप
यांतिते॥१०॥तेषामेवानुकम्पार्थमहमज्ञानजंतमः॥
नाशयाम्यात्मभावस्थोज्ञानदीपेनभास्वता॥११॥अर्जु
नोवाच॥परंब्रह्मपरंधामपवित्रंपरमंभवान्॥पुरु

पंचाशाश्वतंदिव्यमादिदेवमजंविभुम्॥१२॥आहुस्त्वामृषयः
यःसर्वेदेवर्षिनारदस्तथा॥असितोदेवलोव्यासःस्वयं
चैवब्रवीषिमे॥१३॥सर्वमेतदृतम्मन्येयन्मांवदसिकेश
व॥नहितेभगवन्व्यक्तिंविदुर्देवानदानवा॥१४॥स्वयमे
वात्मनात्मानंवेत्थत्वंपुरुषोत्तम॥भूतभावनभूतेशा
देवदेवजगत्पते॥१५॥वक्तुमर्हस्यशेषेणदिव्याह्यात्म
विभूतयः॥याभिर्विभूतिभिर्लोकानिमांस्त्वंव्याप्यतिष्ठ

सि॥१६॥कथंविद्यामहंयोगिंस्त्वांसदापरिचिन्तयन्॥के
षुकेषुचभावेषुचिन्त्योसिभगवन्मया॥१७॥विस्तरेणात्म
नोयोगंविभूतिंजनार्दन॥भूयःकथयतृप्तिर्हिशृण्वतो
नास्तिमेऽमृतम्॥१८॥श्रीभगवानुवाच॥हन्तेकथयि
ष्यामिदिव्याह्यात्मविभूतयः॥प्राधान्यतःकुरुश्रेष्ठना
स्त्यन्तोविस्तरस्यमे॥१९॥अहमात्मागुडाकेशसर्वभूताशा
संस्थित॥अहमादिश्चमध्यंचभूतानामन्तएवच॥२०॥

भः गी ॥५२॥

आदित्यानामहंविष्णुर्ज्योतिषांरविरंशुमान्॥मरीचिर्मरु
तामस्मिनक्षत्राणामहंशशी॥२१॥वेदानांसामवेदोस्मिदेवा
नामस्मिवासव॥इन्द्रियाणांमनश्चास्मिभूतानामस्मिचे
तना॥२२॥रुद्राणांशंकरश्चास्मिवित्तेशोयक्षरक्षसाम्
॥वसूनांपावकश्चास्मिमेरुःशिखरिणामहं॥२३॥पुरो
धसांचमुख्यंमांविद्धिपार्थबृहस्पतिम्॥सेनानीनामः
हंस्कंदःसरसामस्मिसागरः॥२४॥महर्षीणांभृगुरहंगिः

राम ॥५२॥

रामस्त्येकमक्षरः॥यज्ञानांजपयज्ञोस्मिस्थावराणांहि
मालयः॥२५॥अश्वत्थःसर्ववृक्षाणांदेवर्षीणांचनारद
ः॥गंधर्वाणांचित्ररथःसिद्धानांकपिलोमुनिः॥२६॥उचै
ःश्रवसमश्वानांविद्धिमाममृतोद्भवम्॥ऐरावतंगजेंः
द्राणान्नराणांचनराधिपम्॥२७॥आयुधानामहंवज्रं
धेनूनामस्मिकामधुक्॥प्रजनश्चास्मिकंदर्पःसर्पाणाम
स्मिवासुकिः॥२८॥अनन्तश्चास्मिनागानांवरुणोयादसा

महं॥पिद्वराणामर्यमाचास्मियमः संयमतामहं॥२९॥
ग्रहाणस्थास्मिदैत्यानांकालःकलयतामहं॥मृगानांच
मृगेंद्रोहंवैनतेयश्चपक्षिणां॥३०॥पवनःपवतामस्मि
रामःशस्त्रभृतामहं॥झषाणांमकरश्चास्मिस्रोतसाम
जान्हवी॥३१॥सर्गाणामादिरन्तश्चमध्यंचैवाहमर्जुन॥
अध्यात्मविद्याविद्यानांवादःप्रवदतामहम्॥३२॥अ
क्षराणामकारोस्मिद्वंद्वःसामासिकस्यच॥अहमेवाक्ष

यःकालोधाताहंविश्वतोमुखं॥३३॥मृत्युःसर्वहरश्चाहमुद्भ
वश्चभविष्यताम्॥कीर्तिःश्रीर्वाक्चनारीणांस्मृतिर्मेधाधृति
:क्षमा॥३४॥बृहत्सामतथासाम्नागायत्रीछंदसामहं॥
मासानांमार्गशीर्षोहमृतूनांकुसुमाकरः॥३५॥द्यूतंछल
यतामस्मितेजस्तेजस्विनामहं॥जयोस्मिव्यवसायोस्मिस
त्वंसत्ववतामहं॥३६॥वृष्णीनांवासुदेवोस्मिपाण्डवानां
धनंजयः॥मुनीनामप्यहंव्यासःकवीनासुशनाकवि॥३

भः गी ॥५४॥ ॥दशोदमयतामस्मिनीत्तिरस्मिजिगीषतां॥मोन्मे
वास्मिगुह्यानांज्ञानंज्ञानवतामहं॥३८॥औषधीनांयम
श्चास्मिधातूनामस्मिकांचनम्॥सर्वेषांतृणजातीनांद
र्भोहंयज्ञनंदन॥३९॥यच्चापिसर्वभूतानांबीजंतदहम
र्जुन॥नतदस्तिविनायत्स्यान्मयाभूतंचराचरम्॥४०॥ राम
नांतोस्तिममदिव्यानांविभूतीनांपरंतप॥एषतूदे ॥५८॥
शतः प्रोक्तोविभूतेर्विस्तरोमया॥१४॥यद्यद्विभूतिम

सत्वंधीमद्भगवन्मेवला नन्तदेवाक्गछत्वंममतेजो
शस्तस्यजम्॥४२॥अथवाबहुनैतेनकिंज्ञातेनतवार्जु
न॥विष्टभ्याहमिदंकृत्स्नमेकांशेनस्थितोजगत्॥४३॥
॥ ॥इतिश्रीभगवद्गीतासूपनिषत्सुब्र शास्त्रेश्रीकृष्णार्जुनसंवादे॥नतियो मद्भ
क्तियोगोध्यायः॥१०॥ ॥अर्जुनउवाच॥मदनुग्रहायपर
मंगुह्यमध्यात्मसंज्ञितं॥यत्त्वयोक्तंवचस्तेनमोहोयंविग

भः गी ॥५॥ तोमम ॥१॥ भवाप्ययौहितानांऋतोविस्तरशोमयात्व
त्तः कमलपत्राक्षमाहात्म्यमपिचाव्ययम् ॥२॥ एवमेतद्य
थात्वमात्मानंपरमेश्वर ॥ द्रष्टुमिच्छामितेरूपमैश्वरंपुरु
नि ४ षोत्तम ॥३॥ मन्यसेयदितच्छक्यंमयाद्रष्टुमितिप्रभो ॥ योगे
श्वरततोमेत्वंदर्शयात्मानमव्ययम् ॥४॥ श्रीभगवानुवा राम
च ॥ पश्यमेपार्थरूपाणिशतशोथसहस्रशः ॥ नानाविध ॥५॥
धानिदिव्यानिनानावर्णाकृतीनिच ॥५॥ पश्यादित्यावसू

नरुद्रान्त्राश्विनौमरुतस्तथा ॥ बहून्यदृष्टपूर्वाणिपश्याश्च
र्याणिभारत ॥६॥ इहैकस्थंजगत्कृत्स्नंपश्याद्यसचराचरम् ॥ म
मदेहेगुडाकेशयच्चान्यद्द्रष्टुमिच्छसि ॥७॥ नतुमांशक्यसेद्रे
ष्टुमनेनैवस्वचक्षुषा ॥ दिव्यंददामितेचक्षुःपश्यमेयो
गमैश्वरम् ॥८॥ संजयउवाच ॥ एवमुक्त्वाततोराजन्महा
योगेश्वरोहरि ॥ दर्शयामासपार्थायपरमंरूपमैश्वरं ॥९
॥ अनेकवक्त्रनयननमनेकाद्भुतदर्शनम् ॥ अनेकदिव्या

भरणंदिप्तानेकोद्यतायुधम्॥९॥दिव्यमाल्यांबरधरंदिव
गंधानुलेपनम्॥सर्वाश्चर्यमयंदेवमनन्तंविश्वतोमुखम्॥
१०॥दिविसूर्यसहस्रस्यभवेद्युगपदुत्थिता॥यदिभासद्दृ
शीसास्याद्भासस्तस्यमहात्मन॥१२॥तत्रैकस्थंजगत्कृत्स्नं
प्रविभक्तमनेकधा॥अपश्यद्देवदेवस्यशरीरेपाण्डवस्त
दा॥१३॥ततःसविस्मयाविष्टोहृष्टरोमाधनंजय॥प्रणम्यः
शिरसादेवंकृतांजलिरभाषत॥१४॥अर्जुनउवाच॥पश्यामि

देवांस्तवदेवदेहेसर्वांस्तथाभूतविशेषसंघान्॥ब्रह्मा
णमीशंकमलासनस्थमृषींश्चसर्वानुरगांश्चदिव्यान्॥१
५॥अनेकबाहूदरवक्त्रनेत्रंपश्यामित्वांसर्वतोनन्तरूप
म्॥नान्तन्नमध्यन्नपुनस्तवादिम्पश्यामिविश्वेश्वरविश्व
रूप॥१६॥किरीटिनंगदिनंचक्रिणंचतेजोराशिंसर्वतोदीप्ति
मन्तम्॥पश्यामित्वांदुर्निरीक्ष्यंसमंताद्दीप्तानलार्कद्युतिम
प्रमेयम्॥१७॥त्वमक्षरंपरमंवेदितव्यंत्वमस्यविश्वस्यः

परंनिधानम्॥त्वमव्ययः शाश्वतधर्मगोप्तासनातनस्त्वंपु
रुषोमतोमे॥१८॥अनादिमध्यांतमनंतवीर्यमनंतबा
हुंशशिसूर्यनेत्रम्॥पश्यामित्वांदीप्तहुताशवक्त्रंस्वते
जसाविश्वमिदंतपंतम्॥१९॥द्यावापृथिव्योरिदमंतरं
हिव्याप्तंत्वयैकेनदिशश्चसर्वाः॥दृष्ट्वाद्भुतंरूपमुग्रंतवे
दंलोकत्रयंप्रव्यथितंमहात्मनः॥२०॥अमीहित्वांसुरस
ंघाविशंतिकेचिद्भीताःप्रांजलयोगृणंति॥स्वस्तीत्युक्त्वा

महर्षिसिद्धसंघाःस्तुवंतित्वांस्तुतिभिःपुष्कलाभिः॥२१॥रु
द्रादित्यावसवोयेचसाध्याविश्वेश्विनौमरुतश्चोष्मपाश्च॥ग
ंधर्वयक्षासुरसिद्धसंघावीक्षंतेत्वाविस्मिताश्चैवसर्वे॥२२
॥रूपंमहत्तेबहुवक्त्रनेत्रंमहाबाहोबहुबाहूरुपादम्॥बहूद
रंबहुदंष्ट्राकरालंदृष्ट्वालोकाःप्रव्यथितास्तथाहम्॥२३॥नभः
स्पृशंदीप्तमनेकवर्णंव्यात्ताननंदीप्तविशालनेत्रं॥दृ
ष्ट्वाहित्वांप्रव्यथितान्तरात्माधृतिंनविंदामिशमंचविष्णो

॥२४॥ दंष्ट्राकरालानिचतेमुखानिदृष्ट्वैवकालानलसन्नि
भानि॥दिशोनजानेनलभेचशर्मप्रसीदेशजगन्निवास
॥२५॥ अमीचत्वांधृतराष्ट्रस्यपुत्राःसर्वेसहैवावनि
पालसंघैः॥भीष्मोद्रोणःसूतपुत्रस्तथासौसहास्मदी
येरपियोधमुख्यैः॥२६॥वक्त्राणितेत्वरमानाविशंतिदं
ष्ट्राकरालानिभयानकानि॥केचिद्विलग्नादशनांतरेषु
संदृश्यंतेचूर्णितैरुत्तमांगैः॥२७॥यथानदीनांबहवोंबु

वेगाःसमुद्रमेवाभिमुखाद्रवंति॥तथातवामीनरलोकवी
राविशंतिवक्त्राण्यभिविज्वलंति॥२८॥यथाप्रदीप्तंज्व
लनंपतंगाविशंतिनाशायसमृद्धवेगा॥तथैवनाशायवि
शंतिलोकास्तवापिवक्त्राणिसमृद्धवेगाः॥२९॥लेलिह्य
संग्रसमानःसमंताल्लोकान्समग्रान्वदनैर्ज्वलद्भिः॥तेजोभिरा
पूर्यजगत्समग्रंभासस्तवोग्राःप्रतपंतिविष्णो॥३०॥आख्या
हिमेकोभवानुग्ररूपोनमोस्तुतेदेववरप्रसीदः॥विज्ञातु

मिच्छामिभवंतमार्यंनहिप्रजानामित्तवप्रवृत्तिं॥३१॥श्रीभ
गवानुवाच॥कालोस्मिलोकक्षयकृत्प्रवृद्धोलोकान्समाहर्तुमिहप्रवृत्तः॥ऋतेपित्वांनभविष्यंतिसर्वेयेवास्थिताःप्रत्यनीकेषुयोधाः॥३२॥तस्मात्त्वमुत्तिष्ठयशोलभस्वजित्वाशत्रून्भुङ्क्ष्वराज्यंसमृद्धं॥मयैवैतेनिहताःपूर्वमेवनिमित्तमात्रंभवसव्यसाचिन्॥३३॥द्रोणंचभीष्मंचजयद्रथंचकर्णंतथान्यानपियोधवीरान्॥मयाहतान्

राम
॥५६॥

त्वंजहिमान्मथिष्ठायुध्यस्वजेतासिरणेसपत्नान्॥३४॥सं
जयउवाच॥एतच्छ्रुत्वावचनंकेशवस्यकृतांजलिर्वेपमानःकिरीटी॥नमस्कृत्वाभूयएवाहकृष्णंसगद्गदंभीतभीतःप्रणम्य॥३५॥अर्जुनउवाच॥स्थानेहृषीकेशतवप्रकीर्त्याजगत्प्रहृष्यत्यनुरज्यतेच॥रक्षांसिभीतानिदिशोद्रवन्तिसर्वेनमस्यंतिचसिद्धसंघाः॥३६॥कस्माच्चतेनन्महात्मन्नगरीयसेब्रह्मणोप्यादिकर्त्रे॥अनन्तदेवे

राजगन्निचामत्वमक्षरंसदसत्तत्परंयत् ॥ ३७ ॥ त्वमादिदे
वःपुरुषःपुराणस्त्वमस्यविश्वस्यपरंनिधानम् ॥ वेत्ता
सिवेद्यंचपरंचधामत्वयाततविश्वमनंतरूप ॥ ३८ ॥ वायुर्य
मोग्निर्वरुणःशशांकप्रजापतिस्त्वंप्रपितामहश्च ॥ नमोनः
मस्तेस्तसहस्रकृत्वःपुनश्चभूयोपिनमोनमस्ते ॥ ३९ ॥ नम
ःपुरस्तादथपृष्ठतस्तेनमोस्तुतेसर्वतएवसर्व ॥ अनन्त
वीर्यामितविक्रमस्त्वंसर्वंसमाप्नोषितततोसिसर्व ॥ ४० ॥

सखेतिमत्वाप्रसभंयदुक्तंहेकृष्णहेयादवहेसखेति ॥
अजानतामहिमानन्तवेदम्मयाप्रमादात्प्रणयेनवापि ॥
४१ ॥ यच्चावहासार्थमसत्कृतोसिविहारशय्यासनभोजनेषु ॥
एकोथवाप्यच्युततत्समक्षंतत्क्षामयेत्वामहमप्रमेय
म् ॥ ४२ ॥ पितासिलोकस्यचराचरस्यत्वमस्यपूज्यश्चगुरुर्
गरीयान् ॥ नत्वत्समोस्त्यभ्यधिकःकुतोन्योलोकत्रयेप्यप्रति
मप्रभावः ॥ ४३ ॥ तस्मात्प्रणम्यप्रणिधायकायंप्रसादये

त्यामहमीशामीड्यम्।।पितेवपुत्रस्यसखेवसख्युः प्रियः प्रि
यायार्हसिदेवसोढुं।।४४।।अदृष्टपूर्वंहृषितोस्मिदृष्ट्वा
भयेनचप्रव्यथितंमनोमे।।तदेवमेदर्शयदेवरूपं
प्रसीददेवेशजगन्निवास।।४५।।किरीटिनंगदिनंचक्र
हस्तमिच्छामित्वांद्रष्टुमहंतथैव।।तेनैवरूपेणचतुर्भु एम
जेनसहस्रबाहोभवविश्वमूर्ते।।४६।।श्रीभगवानुवाच।। ।।ध्रु।।
मयाप्रसन्नेनतवार्जुनेदंरूपंपरंदर्शितमात्मयोगात्

।।तेजोमयंविश्वमनंतमाद्यंयन्मेत्वदन्येननदृष्टपूर्व।।
४७।।नवेदयज्ञाध्ययनैर्नदानैर्नचक्रियाभिर्नतपोभिरु
ग्रैः।।एवंरूपःशक्यअहंनृलोकेद्रष्टुंत्वदन्येनकुरुप्रवी
वीर।।४८।।मात्तेव्यथामाचविमूढभावोदृष्ट्वारूपंघोरमी
दृङ्ममेदं।।व्यपेतभीःप्रीतमनाःपुनस्त्वंतदेवमेरूप
मिदंप्रपश्य।।४९।।संजयउवाच।।इत्यर्जुनंवासुदेव
स्तथोक्त्वास्वकंरूपंदर्शयामासभूयः।।आश्वासयामासः

सचभीतमेनंभूत्वापुनःसौम्यवपुर्महात्मा॥५०॥अर्जु
नउवाच॥दृष्ट्वेदंमानुषंरूपंतवसौम्यंजनार्द्दन॥इदा
नीमस्मिसंवृत्तःसचेताःप्रकृतिंगतः॥श्रीभगवानुवा
च॥सुदुर्दर्शमिदंरूपंदृष्टवानसियन्मम देवाअप्य
स्यरूपस्यनित्यंदर्शनकांक्षिणः॥५२॥नाहंवेदैर्नतप
सानदानेननचेज्यया॥शक्यएवंविधोद्रष्टुंदृष्टवा
नसिमांयथा॥५३॥भक्त्यात्वनन्ययाशक्यअहमेवंवि

राम
॥६२॥

धोर्जुन॥ज्ञातुंद्रष्टुंचतत्वेनप्रवेष्टुंचपरंतप॥५४॥म
त्कर्मकृन्मत्परोमद्भक्तःसंगवर्जितः॥निर्वैरःसर्वभू
तेषुयःसमामेतिपाण्डव॥५५॥ ॥इतिश्रीमद्भग
वद्गीतासूपनिषत्सुब्रह्मविद्यायांयोगशास्त्रेश्रीकृष्ण
ार्जुनसंवादेविश्वरूपदर्शनोनामैकादशोध्या
यः॥११॥ ॥अर्जुनउवाचएवंसततयुक्तायेभ
क्तास्त्वांपर्युपासते॥येचाप्यक्षरमव्यक्तंतेषांकेयो

0 cmts. 5 10 15

गविन्नमः॥१॥श्रीभगवानुवाच॥मय्यावेश्यमनो
येमांनित्ययुक्तउपासते॥श्रद्धयापरयोपेतास्तेमे
युक्ततमामताः॥२॥येत्वक्षरमनिर्देश्यमव्यक्तंपर्य्युपास
ते॥सर्वत्रगमचिंत्यंचकूटस्थमचलंध्रुवं॥३॥सन्नियम्
येन्द्रियग्रामंसर्वत्रसमबुद्धयः॥तेप्राप्नुवंतिमामेवस
र्वभूतहितेरताः॥४॥क्लेशोधिकतरस्तेषामव्यक्तासक्त
चेतसां॥अव्यक्ताहिगतिर्दुःखंदेहवद्भिरवाप्यते॥५॥

॥येतुसर्वाणिकर्माणिमयिसन्न्यस्यमत्पराः॥अनन्येनैव
योगेनमांध्यायंतउपासते॥६॥तेषामहंसमुद्धर्त्तामृत्यु
संसारसागरात्॥भवामिनाचिरात्पार्थमय्यावेशितचे
तसां॥७॥मय्येवमनआधत्स्वमयिबुद्धिंनिवेशय॥
निवसिष्यसिमय्येवअतऊर्द्धंनसंशयः॥८॥अथचित्तं
समाधातुंनशक्नोषिमयिस्थिरं॥अभ्यासयोगेनततो
मिच्छाप्तुंधनंजय॥९॥अभ्यासेप्यसमर्थोसिमत्कर्मय

रमोभव॥सर्वधर्मानपिकर्माणिकुर्वन्मिद्विमवाप्स्यसि॥५॥
अथैतदप्यशक्तोषिकर्तुंमद्योगमाश्रितः॥सर्वकर्मफल
त्यागंततःकुरुयतात्मवान्॥११॥श्रेयोहिज्ञानमभ्यासाज्ज्ञा
नाध्यानंविशिष्यते॥ध्यानात्कर्मफलत्यागस्त्यागाच्छांति
रनंतरं॥१२॥अद्वेष्टासर्वभूतानांमैत्रःकरुणएवच॥नि
र्ममोनिरहंकारःसमदुःखसुखक्षमी॥१३॥संतुष्टःसत
तंयोगीयतात्मादृढनिश्चयः॥मय्यर्पितमनोबुद्धिर्योम

द्भक्तःसमेप्रियः॥१४॥यस्मान्नोद्विजतेलोकोलोकान्नोद्
द्विजतेचयः॥हर्षामर्षभयोद्वेगैर्मुक्तोयःसचमेप्रिय
॥१५॥अनपेक्षःशुचिर्दक्षउदासीनोगतव्यथः॥सर्वा
रंभपरित्यागीयोमद्भक्तःसमेप्रियः॥१६॥योनहृष्यति
नद्वेष्टिनशोचतिनकांक्षति॥शुभाशुभपरित्यागीभ
क्तिमान्यःसमेप्रियः॥१७॥समश्चत्रौचमित्रेचतथाः
मानापमानयोः॥शीतोष्णसुखदुःखेषुसमःसंगवि

वर्जितः ॥१८॥ तुल्यनिंदास्तुतिर्मौनीसंतुष्टोयेनकेनचि
त् ॥ अनिकेतः स्थिरमतिर्भक्तिमान्मेप्रियोनरः ॥१९॥
येतुधर्म्यामृतमिदंयथोक्तंपर्युपासते ॥ श्रद्दधानाः
मत्परमाभक्तास्तेतीवमेप्रियाः ॥२०॥ ॥इति श्रीभ
गवद्गीतासूपनिषत्सुब्रह्मविद्यायांयोगशास्त्रेश्री कृष्ण राम
र्जुनसंवादेक्षेत्रक्षेत्रज्ञयोगोनामत्रयोदशोध्यायः ॥१३॥ ॥ ॥६५॥
श्रर्जुन उवाच ॥ प्रकृतिंपुरुषंचैवक्षेत्रंक्षेत्रज्ञमेवच

एतद्वेदितुमिच्छामिज्ञानंज्ञेयंचकेशव ॥ श्रीभग
वानुवाच ॥ इदंशरीरंकौन्तेयक्षेत्रमित्यभिधीयते
एतद्योवेत्तिंतंप्राहुःक्षेत्रज्ञमितितद्विदः ॥२॥ क्षे
त्रज्ञंचापिमांविद्धिसर्वक्षेत्रेषुभारत ॥ क्षेत्रक्षेत्रज्ञ
योर्ज्ञानंयत्तज्ज्ञानंमतंमम ॥३॥ तत्क्षेत्रंयच्चयादृक्च
यद्विकारियतश्चयत् ॥ सचयोयत्प्रभावश्चतत्समा
सेनमेशृणु ॥४॥ ऋषिभिर्बहुधागीतंछंदोभिर्विवि

वैः पृथक्॥ ब्रह्मसूत्रपदैश्चैव हेतुमद्भिर्विनिश्चितैः॥
५॥ महाभूतान्यहंकारो बुद्धिरव्यक्तमेव च॥ इन्द्रियाणि
दशैकं च पञ्च चेन्द्रियगोचराः॥ ६॥ इच्छा द्वेषः सुखं दुःखं
संघातश्चेतना धृतिः॥ एतत्क्षेत्रं समासेन सविकारमुदा
हृतं॥ ७॥ अमानित्वमदंभित्वमहिंसाक्षांतिरार्जवं॥ आ
चार्योपासनं शौचं स्थैर्यमात्मविनिग्रहः॥ ८॥ इन्द्रियार्थे
ष्वैराग्यमनहंकार एव च॥ जन्ममृत्युजरारोगाधि

राम ६६

दुःखदोषानुदर्शनं॥ ९॥ असक्तिरनभिष्वंगः पुत्रदार
गृहादिषु॥ नित्यं च समचित्तत्वमिष्टानिष्टोपपत्तिषु
॥ १०॥ मयि चानन्ययोगेन भक्तिरव्यभिचारिणी॥ विवि
क्तदेशसेवित्वमरतिर्जनसंसदि॥ ११॥ अध्यात्मज्ञाननि
त्यत्वं तत्त्वज्ञानार्थदर्शनं॥ एतज्ज्ञानमितिप्रोक्तमज्ञानं
यदतोन्यथा॥ १२॥ ज्ञेयं यत्तत्प्रवक्ष्यामि यज्ज्ञात्वामृतम
श्नुते॥ अनादिमत्परं ब्रह्म न सत्तन्नासदुच्यते॥ १३॥ सर्व

नःपाणिपादंतत्सर्वतोक्षिशिरोमुखं ॥ सर्वतःश्रुतिमल्लो
केसर्वमावृत्यतिष्ठति ॥ १४ ॥ सर्वेन्द्रियगुणाभासंसर्वेन्द्रि
यविवर्जितं ॥ असक्तंसर्वभृच्चैवनिर्गुणंगुणभोक्तृत ॥
१५ ॥ बहिरंतश्चभूतानामचरंचरमेवच ॥ सूक्ष्मत्वात्तद
विज्ञेयंदूरस्थंचांतिकेचतत् ॥ १६ ॥ अविभक्तंचभूतेषु
विभक्तमिवचस्थितं ॥ भूतभर्तृचतज्ज्ञेयंग्रसिष्णुप्रभ
विष्णुच ॥ १७ ॥ ज्योतिषामपितज्ज्योतिस्तमसःपरमुच्य

ते ॥ ज्ञानंज्ञेयंज्ञातगम्यंहृदिसर्वस्यविष्ठितं ॥ १८ ॥
इतिक्षेत्रंतथाज्ञानंज्ञेयंचोक्तंसमासतः ॥ मद्भक्त एत
तद्विज्ञायमद्भावायोपपद्यते ॥ १९ ॥ प्रकृतिंपुरुषंचै
वविद्ध्यनादीउभावपि ॥ विकारांश्चगुणांश्चैवविद्धि
प्रकृतिसंभवान् ॥ २० ॥ कार्यकारणकर्तृत्वेहेतुःप्रकृ
तिरुच्यते ॥ पुरुषःसुखदुःखानांभोक्तृत्वेहेतुरुच्यते
॥ २१ ॥ पुरुषःप्रकृतिस्थोहिभुंक्तेप्रकृतिजान्गुणान् ॥ का

रागगुणासंगोस्यसदस द्योनिजन्मसु ॥२२॥ उपद्रष्टानुमंता
च भर्त्ताभोक्तामहेश्वरः ॥ परमात्मेतिचाप्युक्तोदेहेस्मिन्पुरु
षः परः ॥२३॥ यएवंवेत्तिपुरुषंप्रकृतिंचगुणैः सह ॥ सर्व
थावर्त्तमानोपिनसभूयोभिजायते ॥२४॥ ध्यानेनात्मनियश्यं
तिकेचिदात्मानमात्मना ॥ अन्येसांख्येनयोगेनकर्मयोगेनचा
परे ॥२५॥ अन्येत्वेवमजानंतः श्रुत्वान्येभ्यउपासते ॥ ते
पिचातितरंत्येवमृत्युंश्रुतिपरायणाः ॥२६॥ यावत्संजायते

तेकिंचित्सत्त्वंस्थावरजंगमं ॥ क्षेत्रक्षेत्रज्ञसंयोगात्तद्विद्धि
भरतर्षभ ॥२७॥ समंसर्वेषुभूतेषुतिष्ठंतंपरमेश्वरं ॥
विनश्यत्स्वविनश्यंतंयःपश्यतिसपश्यति ॥२८॥ समंय
श्यन्हिसर्वत्रसमवस्थितमीश्वरं ॥ नहिनस्त्यात्मनात्मा
नंततोयातिपरांगतिं ॥२९॥ प्रकृत्यैवचकर्माणिक्रीय
माणानिसर्वशः ॥ यःपश्यतितथात्मानमकर्तारंसय
श्यति ॥३०॥ पृथग्भावमेकस्थमनुपश्यतिता

तएवचविस्तारंब्रह्मसंपद्यतेतदा ॥३१॥ अनादित्वान्निर्गु
णत्वात्परमात्मायमव्ययः ॥ शरीरस्थोपिकौन्तेयनकरोति
नलिप्यते ॥३२॥ यथासर्वगतंसौक्ष्म्यादाकाशंनोपलिप्यते ॥
सर्वत्रावस्थितोदेहेतथात्मानोपलिप्यते ॥३३॥ यथाप्रका
शयत्येकःकृत्स्नंलोकमिमंरविः ॥ क्षेत्रंक्षेत्रीतथाकृत्स्नप्र
काशयतिभारत ॥३४॥ क्षेत्रक्षेत्रज्ञयोरेवमंतरंज्ञानचक्षु
षा ॥ भूतप्रकृतिमोक्षंचयेविदुर्यांतितेपरं ॥३५॥ ॥

॥६६॥

इतिश्रीभगवद्गीतासूपनिषत्सुब्रह्मविद्यायांयोगशा
स्त्रेश्रीकृष्णार्जुनसंवादेक्षेत्रक्षेत्रज्ञयोगोनामत्रयोदशो
ध्यायः ॥१३॥ ॥श्रीभगवानुवाच ॥परंभूयःप्रव
क्ष्यामिज्ञानानांज्ञानमुत्तमं ॥ यज्ज्ञात्वामुनयःसर्वेपरांसि
द्धिमितोगताः ॥१॥ इदंज्ञानमुपाश्रित्यममसाधर्म्यमाग
ताः ॥ सर्गेपिनोपजायंतेप्रलयेनव्यथंतिच ॥२॥ ममयो
निर्महद्ब्रह्मतस्मिन्गर्भंदधाम्यहं ॥ संभवःसर्वभूतानां

भः गी ततोभवतिभारत ॥ ३ ॥ सर्वयोनिषुकौन्तेयमूर्त्तयःसंभवंति
॥ १७ ॥ याः ॥ तासांब्रह्ममहद्योनिरहंबीजप्रदःपिता ॥ ४ ॥ सत्वंरजः
स्तमइतिगुणाः प्रकृतिसंभवाः ॥ निबध्नंतिमहाबाहोदे
हेदेहिनमव्ययं ॥ तत्रसत्वंनिर्मलत्वात्प्रकाशकमनाम
यं ॥ सुखसंगेनबध्नातिज्ञानसंज्ञेनचानघ ॥ ६ ॥ रजो रम
जोरागात्मकंविद्धितृष्णासंगसमुद्भवं ॥ तन्निबध्नाति ॥ ७ ॥
कौन्तेयकर्मसंगेनदेहिनं ॥ ७ ॥ तमस्त्वज्ञानजंविद्धि

२

मोहनंसर्वदेहिनां ॥ प्रमादालस्यनिद्राभिस्तन्निबध्ना
तिभारत ॥ ८ ॥ सत्वंसुखेसंजयतिरजःकर्म्मणिभारत
॥ ज्ञानमावृत्यतुतमःप्रमादेसंजयत्युत ॥ ९ ॥ रजस्तम
श्चाभिभूयसत्वंभवतिभारत ॥ रजःसत्वंतमश्चैवत
मःसत्वंरजस्तथा ॥ १० ॥ सर्वद्वारेषुदेहेस्मिन्प्रकाशउप
जायते ॥ ज्ञानंयदातदाविद्याद्विवृद्धंसत्वमित्युत ॥
११ ॥ लोभःप्रवृत्तिरारंभःकर्मणामशमःस्पृहा ॥ रजसे

0 cmts. 5 10 15

तानिजायंतेविद्वद्भेभरतर्षभ॥२॥अजकानोजहृति
श्चअमादोमोहएवच॥तमस्यतानिजायंतेविवृद्धेकुरु
नंदन॥३॥यदासत्वेप्रवृद्धेतुप्रलयंयातिदेहभृत्॥त
दोत्तमविदांल्लोकानमलान्प्रतिपद्यते॥४॥रजसिप्रल
यंगत्वाकर्मसंगिषुजायते॥तथाप्रलीनस्तमसिमूढ
योनिषुजायते॥५॥कर्मणःसुकृतस्याहुःसात्विकंनिः
र्मलंफलं॥रजसस्तुफलंदुःखमज्ञानंतमसःफलं॥६

॥सत्वात्संजायतेज्ञानंरजसोलोभएवच॥प्रमादमोहौत
मसोभवताज्ञानमेवच॥७॥ऊर्द्धंगच्छंतिसत्वस्थामध्य
तिष्ठंतिराजसाःजघन्यगुणवृत्तिस्थाअधोगच्छंतिता
मसाः॥८॥नान्यंगुणेभ्यःकर्तारंयदाद्रष्टानुपश्यति॥
गुणेभ्यश्चपरंवेत्तिमद्भावंसोधिगच्छति॥९॥गुणाने
तानतीत्यत्रीन्देहीदेहसमुद्भवान्॥जन्ममृत्युजरादुः
खैर्विमुक्तोमृतमश्नुते॥२०॥अर्जुनउवाच॥कैर्लिंगै

स्त्रीन्गुणानेतानतीतोभवतिप्रभो॥किमाचारःकथंचै
तांस्त्रीन्गुणानतिवर्त्तते॥२१॥श्रीभगवानुवाच॥प्रकाशं
चप्रवृत्तिंचमोहमेवचपाण्डव॥नद्वेष्टिसंप्रवृत्ता
निननिवृत्तानिकांक्षति॥२२॥उदासीनवदासीनोगु
णैर्योनविचाल्यते॥गुणावर्त्तंतइत्येवंयोवतिष्ठतिनेङ्गते॥२३॥समदुःखसुखःस्वस्थःसमलोष्टाश्मकां
चनः॥तुल्यप्रियाप्रियोधीरस्तुल्यनिंदात्मसंस्तु

तिः॥२४॥मानापमानयोस्तुल्यस्तुल्योमित्रारिपक्षयोः
॥सर्वारंभपरित्यागीगुणातीतःसउच्यते॥२५॥माचयो
व्यभिचारेणभक्तियोगेनसेवते॥सगुणान्समतीत्यैः
ताब्रह्मभूयायकल्पते॥२६॥ब्रह्मणोहिप्रतिष्ठाहम
मृतस्याव्ययस्यच॥शाश्वतस्यचधर्मस्यसुखस्यैकां
तिकस्यच॥२७॥॥इतिश्रीभगवद्गीतासूपनि
षत्सुब्रह्मविद्यायांयोगशास्त्रेश्रीकृष्णार्जुनसंवा

भगी देगुणत्रय विभागयो गेनासक्तदर्शनोधाध ॥
॥७३॥ ॥१४॥ ॥श्रीभगवानुवाच॥ऊर्द्ध्वमूलःमधःशा
खमश्वत्थंप्राहुरव्ययं॥छंदांसियस्यपर्णानियस्तं
वेदसवेदवित्॥॥अधश्चोर्द्ध्वंप्रसृतास्तस्यशाखा
गुणप्रवृद्धाविषयप्रवाला अधश्चमूलान्यनुसंत॥ रम
तानिकर्मानुबंधीनिमनुष्यलोके॥२॥नरूपमस्येहत ॥७३॥
थोपलभ्यतेनांतोनचादिर्नचसंप्रतिष्ठा॥अश्वत्थ

मेनंसुविरूढमूलमसंगशस्त्रेणदृढेनछित्वा॥३॥
ततःपदंतत्परिमार्गितव्यंयस्मिंनातानिवर्त्तन्तिभू
यः॥तमेवचाद्यंपुरुषंप्रपद्येयतःप्रवृत्तिःप्रसृतापु
राणी॥४॥निर्मानमोहाजितसंगदोषाअध्यात्मनित्या
विनिवृत्तकामाः॥द्वन्द्वैर्विमुक्तासुखदुःखसंज्ञैर्गच्छंत्य
मूढाःपदमव्ययंतत्॥५॥नतद्भासयतेसूर्योनशशांगा
कोनपावकः॥यद्गत्वाननिवर्त्तन्तेतद्धामपरमंमम

॥६॥ममैवांशोजीवलोकेजीवभूतःसनातनः॥मनःषष्ठा
नीन्द्रियाणिप्रकृतिस्थानिकर्षति॥७॥शरीरंयदवाप्नो
तियच्चाप्युत्क्रामतीश्वरः॥गृहीत्वैतानिसंयातिवायुर्ग
न्धानिवाशयात्॥८॥श्रोत्रंचक्षुःस्पर्शनंचरसनंघ्राण
मेवच॥अधिष्ठायमनश्चायंविषयान्उपसेवते॥९॥
उत्क्रामंतंस्थितंवापिभुंजानंवागुणान्वितं॥विमूढा
नानुपश्यंतिपश्यंतिज्ञानचक्षुषः॥१०॥यततोयोगि

राम.
॥७४॥

नश्चैनंपश्यंत्यात्मन्यवस्थितं॥यतंतोप्यकृतात्मानोनै
नंपश्यंत्यचेतसः॥११॥यदादित्यगतंतेजोजगद्भासय
तेखिलं॥यच्चन्द्रमसियच्चाग्नौतत्तेजोविद्धिमामकम्॥
१२॥गामाविश्यचभूतानिधारयाम्यहमोजसा॥पुष्णा
मिचौषधीःसर्वाःसोमोभूत्वारसात्मकः॥१३॥अहंवैश्वा
नरोभूत्वाप्राणिनांदेहमाश्रितः॥प्राणापानसमायुक्तः
पचाम्यन्नंचतुर्विधं॥१४॥सर्वस्यचाहंहृदिसन्निविष्टो

मत्तःस्मृतिर्ज्ञानमपोहनंच॥वेदैश्चसर्वैरहमेववेद्यो
वेदांतकृद्वेदविदेवचाहं॥१५॥द्वाविमौपुरुषौलोकेक्ष
रश्चाक्षरएवच॥क्षरःसर्वाणिभूतानिकूटस्थोक्षरउ
च्यते॥१६॥उत्तमःपुरुषस्त्वन्यःपरमात्मत्युदाहृतः॥यो
लोकत्रयमाविश्यबिभर्त्यव्ययईश्वरः॥१७॥यस्मात्क्ष
रमतीतोहमक्षरादपिचोत्तमः॥अतोस्मिलोकेवेदेच॥ रम
प्रथितःपुरुषोत्तमः॥१८॥योमामेवमसंमूढोजानाति ॥७५॥

पुरुषोत्तमं॥ससर्वविद्भजतिमांसर्वभावेनभारत॥१९॥
इतिगुह्यतमंशास्त्रमिदमुक्तंमयानघ॥एतद्बुध्वाबुद्धि
मान्स्यात्कृतकृत्यश्चभारत॥२०॥ ॥इति श्रीभगवद्गी
तासूपनिषत्सुब्रह्मविद्यायांयोगशास्त्रेश्रीकृष्णार्जुन
संवादेपुरुषोत्तमयोगोनामपंचदशोध्यायः॥ १५ ॥
॥ ॥श्रीभगवानुवाच॥अभयंसत्वसंशुद्धिर्ज्ञानयो
गव्यवस्थितिः॥दानंदमश्चयज्ञश्चस्वाध्यायस्तपआर्ज

वं॥१॥अहंसासत्यमक्रोधस्त्यागःशांतिरपैशुनं॥दयाभू
तेष्वलोलुत्वमार्दवंह्रीरचापलं॥२॥तेजःक्षमाधृतिःशौ
चमद्रोहोनातिमानिता॥भवंतिसंपदंदैवीमभिजातस्य
भारत॥३॥दंभोदर्पोभिमानश्चक्रोधःपारुष्यमेवच॥अ
ज्ञानंचाभिजातस्यपार्थसंपदमासुरीम्॥४॥दैवीसंपद्विमो
क्षायनिबंधायासुरीमता॥मासुचःसंपदंदैवीमभिजातो
सिपांडव॥५॥द्वौभूतसर्गौलोकेस्मिन्दैवआसुरएवच॥

दैवोविस्तरशःप्रोक्तःआसुरंपार्थमेशृणु॥६॥प्रवृत्तिंच
निवृत्तिंचजनानविदुरासुराः॥नशौचंनापिचाचारोन
त्यंतेषुविद्यते॥७॥असत्यमप्रतिष्ठंतेजगदाहुरनीश्व
रं॥अपरस्परसंभूतंकिमन्यत्कामहैतुकं॥८॥एतांदृष्टि
मवष्टभ्यनष्टात्मानोल्पबुद्धयः॥प्रभवंत्युग्रकर्माणःक्षया
यजगतोहिताः॥९॥काममाश्रित्यदुःपूरंदंभमानमदान्वि
ताः॥मोहाद्गृहीत्वासद्ग्राह्रान्प्रवर्तंतेशुचिव्रताः॥१०॥चिं

नामयरिमेयांचश्रलयान्नासुमाश्रिताः॥कामोपभोग
॥७७॥ रमारतावदितिनिश्चिताः॥११॥आशापाशशतैर्बद्धा :
कामक्रोधपरायणाः॥ईहंतेकामभोगार्थमन्यायेनार्थसं
चयान्॥१२॥इदमद्यमयालब्धमिदंप्राप्स्येमनोरथं॥इद
मस्तीदमपिमेभविष्यत्यपुनर्द्धनं॥१३॥असौमयाहतः एम
शत्रुर्हनिष्येचापरानपि॥ईश्वरोहमहंभोगीसिद्धोहंब ॥७७
लवान्सुखी॥१४॥आढ्योभिजनवानस्मिकोन्योस्तिसदृशो

मया॥यक्ष्येदास्यामिमोदिष्यइत्यज्ञानविमोहिताः॥१५॥
अनेकचित्तविभ्रांतामोहजालसमावृताः॥प्रसक्ताःकामभो
गेषुपतंतिनरकेशुचौ॥१६॥आत्मसंभाविताःस्तब्धाधनमा
नमदान्विताः॥यजंतेनामयज्ञैस्तेदंभेनाविधिपूर्वकं॥१७
॥अहंकारंबलंदर्पंकामंक्रोधंचसंश्रिताः॥मामात्मपरदे
हेषुप्रद्विषंतोभ्यसूयकाः॥१८॥तानहंद्विषतःक्रूरान्संसा
रेषुनराधमान्॥क्षिपाम्यजस्रमशुभानासुरीष्वेवयोनि

पु।।१९।।आसुरीं योनिमापन्ना मूढा जन्मनि जन्मनि।।मा
मप्राप्यैव कौन्तेय ततो यांत्यधमां गतिं।।२०।।त्रिविधं नर
कस्येदं द्वारं नाशनमात्मनः।।कामः क्रोधस्तथा लोभस्त
स्मादेतत्त्रयं त्यजेत्।।२१।।एतैर्विमुक्तः कौन्तेय तमोद्वारै
स्त्रिभिर्नरः।।आचरत्यात्मनः श्रेयस्ततो याति परां गतिं।।
२२।।यः शास्त्रविधिमुत्सृज्य वर्तते कामकारतः।।न स सि
द्धिमवाप्नोति न सुखं न परां गतिं।।२३।।तस्माच्छास्त्रं प्रः

माणं ते कार्याकार्यव्यवस्थितौ।।ज्ञात्वा शास्त्रविधानोक्तं क
र्म कर्तुमिहार्हसि।।२४।। ।।इति श्रीभगवद्गीतासूप
निषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवा
दे दैवासुरसंपद्विभागयोगो नाम षोडशोऽध्यायः।।१६।।
।। ।।अर्जुन उवाच।।ये शास्त्रविधिमुत्सृज्य यजन्ते
श्रद्धयान्विताः।।तेषां निष्ठा तु का कृष्ण सत्त्वमाहो रजस्त
मः।।१।।श्रीभगवानुवाच।।त्रिविधा भवति श्रद्धा

देहिनांसास्वभावजा॥सात्विकीराजसीचैवतामसीचेतितां॥
शृणु॥२॥सत्वानुरूपासर्वस्यश्रद्धाभवतिभारत॥श्रद्ध
मयोयंपुरुषोयोयच्छ्रद्धःसएवसः॥३॥यजन्तेसात्विकादे
वान्यक्षरक्षांसिराजसाः॥प्रेतान्भूतगणांश्चान्येयजंते
तामसाजनाः॥४॥अशास्त्रविहितंघोरंतप्यंतेयेतपोज
नाः॥दंभाहंकारसंयुक्ताःकामरागबलान्विताः॥५॥कर्ष
यंतःशरीरस्थंभूतग्राममचेतसः॥मांचैवांतःशरीर॥

स्थंतान्विद्ध्यासुरनिश्चयान्॥६॥आहारस्त्वपिसर्वस्य॥
त्रिविधोभवतिप्रियः॥यज्ञस्तपस्तथादानंतेषांभेदमिः
मंशृणु॥७॥आयुःसत्ववलारोग्यसुखप्रीतिविवर्द्धना
॥रस्याःस्निग्धाःस्थिराहृद्याआहाराःसात्विकप्रियाः॥८॥
कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदाहिनः॥आहारारा
जसस्येष्टादुःखशोकामयप्रदाः॥९॥यातयामंगतरस
पूतिपर्य्युषितंचयत्॥उच्छिष्टमपिचामेध्यंभोजनंता

मसज्जियं॥१०॥अफलकांक्षिभिर्यज्ञोविधिदृष्टोय इज्यते
॥यष्टव्यमेवेतिमनःसमाधायसात्विकः॥११॥अभि
संधायतुफलंदंभार्थमपिचैवयत्॥इज्यतेभरतश्रे
ष्ठतंयज्ञंविद्धिराजसं॥१२॥विधिहीनमसृष्टान्नंमं
त्रहीनमदक्षिणं॥श्रद्धाविरहितंयज्ञंतामसंपरिच
क्षते॥१३॥देवद्विजगुरुप्राज्ञपूजनंशौचमार्जवं॥ब्रह्म
चर्यमहिंसाचशारीरंतपउच्यते॥१४॥मनःप्रसादः

सौम्यत्वंमौनमात्मविनिग्रहः॥भावसंशुद्धिरित्येतत्तपो
मानसमुच्यते॥१५॥अनुद्वेगकरंवाक्यंसत्यंप्रियहितं
चयत्॥स्वाध्यायाभ्यसनंचैवङ्मयतपउच्यते॥१६॥प्र
ह्यापरयातंतपस्तत्त्रिविधंनरैः॥अफलाकांक्षिभि
र्युक्तैःसात्विकंपरिचक्षते॥१७॥सत्कारमानपूजार्थंत
पोदंभेनचैववत्॥क्रियतेतदिहप्रोक्तंराजसंचलं
मध्रुवं॥१८॥मूढग्राहेणात्मनोयत्पीडयाक्रियतेतपः

॥परस्योत्सादनार्थंवातन्नामसमुदाहृतं॥१९॥दात
व्यमितियद्दानंदीयतेनुपकारिणे॥देशेकालेचपात्रे
चतद्दानंसात्विकंस्मृतं॥२०॥यत्तुप्रत्युपकारार्थंफ
लमुद्दिश्यवापुनः॥दीयतेचपरिक्लिष्टंतद्दानंरसमु
दाहृतम्॥२१॥अदेशकालेयद्दानमपात्रेभ्यश्चदीयते
॥असत्कृतमवज्ञातंतत्तामसमुदाहृतम्॥२२॥ओंतत्स
दितिश्रुतिविधिः पुरा॥तस्माद्योमित्युदाहृत्यमज्ञः

दानतपःक्रियाः॥प्रवर्त्तन्तेविधानोक्ताःसततंब्रह्मवा
दिनाम्॥२४॥तदित्यनभिसंधायफलंयज्ञतपःक्रियाः॥
दानक्रियाश्चविविधाःक्रियन्तेमोक्षकांक्षिभिः॥२५॥स
द्भावेसाधुभावेचसदित्येतत्प्रयुज्यते॥प्रशस्तेकर्मणितथा
सच्छब्दःपार्थयुज्यते॥२६॥यज्ञेतपसिदानेचस्थितिस
दितिचोच्यते॥कर्मचैवतदर्थीयंसदित्येवाभिधीयते
॥२७॥अश्रद्धयाहुतंदत्तंतपस्तप्तंकृतंचयत्॥असदि

मुच्यतेपार्थनचतत्रेत्येनादृह॥२८॥ ॥इति श्रीम॰ग॰
वद्गीतासूपनिषत्सुब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णा॰
र्जुनसंवादे त्रिगुणविभागयोगोनामसप्तदशोध्यायः॥
१७॥ ॥श्रीभगवानुवाच॥संन्यासस्यमहाबाहोतत्त्वमि
च्छामिवेदितुम्॥त्यागस्यचहृषीकेशपृथक्केशिनिसूद॰
नः॥१॥श्रीभगवानुवाच॥काम्यानांकर्मणांन्यासंसन्यासं॰
कवयोविदुः॥सर्वकर्मफलत्यागंप्राहुस्त्यागविचक्षणा

॥२॥त्याज्यंदोषवदित्येकेकर्मप्राहुर्मनीषिणः॥यज्ञदा
नतपःकर्मनत्याज्यमितिचापरे॥३॥निश्चयंशृणुमेत
त्रत्यागेभरतसत्तम॥त्यागोहिपुरुषव्याघ्रत्रिविधःसं
प्रकीर्त्तितः॥४॥यज्ञदानतपःकर्मनत्याज्यंकार्यमेवतत्
॥यज्ञोदानंतपश्चैवपावनानिमनीषिणाम्॥५॥एता
न्यपितुकर्माणिसंगंत्यक्त्वाफलानिच॥कर्त्तव्यानीतिमे
पार्थनिश्चयंमतमुत्तमं॥६॥नियतस्यतुसंन्यासःकर्म

लोनोपपद्यते॥मोहात्तस्यपरित्यागस्तामसःपरिकीर्त्ति
तः॥७॥दुःखमित्येवयत्कर्मकायक्लेशभयात्त्यजेत्॥स
कृत्वारजसस्त्यागंनैवत्यागफलंलभेत्॥८॥कार्यमित्येव
यत्कर्मनियतंक्रियतेऽर्जुन॥संगंत्यक्त्वाफलंचैवसत्याग
ःसात्विकोमतः॥९॥नद्वेष्ट्यकुशलंकर्मकुशलेनानुषज्य
ते॥त्यागीसत्वसमाविष्टोमेधावीछिन्नसंशयः॥१०॥नहि
देहभृतासक्यंत्यक्तुंकर्माण्यशेषतः॥यस्तुकर्मफलत्यागी

त्यागीत्यभिधीयते॥११॥अनिष्टमिष्टंमिश्रंचत्रिविधंक
र्मणःफलम्॥भवत्यत्यागिनांप्रेत्यनतुसन्यासिनांक्वचि
त्॥१२॥पंचैतानिमहाबाहोकारणानिनिबोधमे॥सांख्ये
कृतांतेप्रोक्तानिसिद्धयेसर्वकर्मणाम्॥१३॥अधिष्ठान
तथाकर्त्ताकरणंचपृथग्विधम्॥विविधाश्चपृथक्चे
ष्टादैवंचैवात्रपंचमम्॥१४॥शरीरवाङ्मनोभिर्यत्कर्म
प्रारभतेनरः॥न्याय्यंवाविपरीतंवापंचैतेतस्यहेतवः॥१५॥

नत्वैवंसतिकर्तारमात्मानंकेवलंतुयः॥यद्यप्यकृतबु
द्धित्वान्नसयत्रपतिदुर्मतिः॥१७॥यस्यनाहंकृतोभावो
द्धिर्यस्यनलिप्यते॥हत्वापिसइमाल्लोकान्नहंतिनानिब
ध्यते॥१७॥ज्ञानंज्ञेयंपरिज्ञातात्रिविधाकर्मचोदना॥कर
णंकर्मकर्तेतित्रिविधःकर्मसंग्रहः॥१८॥ज्ञानंकर्मचक
र्ताचत्रिधैवगुणभेदतः॥प्रोच्यतेगुणसंख्यानेयथाव
च्छृणुतान्यपि॥१९॥सर्वभूतेषुयेनैकंभावमव्ययमी॥

क्षते॥अविभक्तंविभक्तेषुतज्ज्ञानंविद्धिसात्विकं॥२०॥
पृथक्त्वेनतुयज्ज्ञाननानाभावान्पृथग्विधान्॥वेत्ति
सर्वेषुभूतेषुतज्ज्ञानंविद्धिराजसं॥२१॥यत्तुकृत्स्नव
देकस्मिन्कार्येसक्तमहैतुकं॥अतत्त्वार्थवदल्पंचतत्
तामसमुदाहृतं॥२२॥नियतंसंगरहितमरागद्वेषतः
कृतं॥अफलप्रेप्सुनाकर्मयत्तत्सात्विकमुच्यते॥
२३॥यत्तुकामेप्सुनाकर्मसाहंकारेणवापुनः॥क्रियते

वकुलायासंतद्वाजसमुदाहृतं ॥ २४ ॥ अनुबंधक्षयंहिं
सामनवेक्ष्यचपौरुषं ॥ मोहादारभ्यतेकर्मयत्तत्तामसमु
दाहृतं ॥ २५ ॥ मुक्तसंगोनहंवादीधृत्युत्साहसमन्वितः ॥
सिद्ध्यसिद्ध्योर्निर्विकारःकर्तासात्विकउच्यते ॥ २६ ॥ रागी
कर्मफलप्रेप्सुर्लुब्धोहिंसात्मकोऽशुचिः ॥ हर्षशोकान्वित
:कर्तारजसःपरिकीर्तितः ॥ २७ ॥ अयुक्तःप्राकृतस्तब्धः
शठश्चकृतिकोलसः ॥ विषादीदीर्घसूत्रीचकर्तातामस

सउच्यते ॥ २८ ॥ बुद्धेर्भेदंधृतेश्चैवगुणतस्त्रिविधंशृणु ॥ प्रो
च्यमानमशेषेणपृथक्त्वेनधनंजय ॥ २९ ॥ प्रवृत्तिंचनिः
वृत्तिंचकार्याकार्येभयाभये ॥ बंधमोक्षंचयावेत्तिबुद्धिःसा
पार्थसात्त्विकी ॥ ३० ॥ ययाधर्ममधर्मंचकार्यंचाकार्यमेवच ॥
अधर्मंधर्ममितियामन्यतेतमसावृता ॥ अयथावत्प्रजानाः
तिबुद्धिःसापार्थराजसी ॥ ३१ ॥ अधर्मंधर्ममितियामन्यतेत
मसावृता ॥ सर्वार्थान्विपरीतांश्चबुद्धिःसापार्थतामसी ॥ ३२

धृत्माययाधारयतेमनःप्राणेन्द्रियःक्रियाः॥ योगेनाव्यभि
चारिण्याधृतिःसापार्थसात्विकी॥३३॥ ययातुधर्मकामार्था
न्धृत्माधारयतेर्जुन॥ प्रसंगेनफलाकांक्षीधृतिःसापार्थराज
सी॥३४॥ ययास्वप्नंभयंशोकंविषादंमदमेवच॥ नाविमुं
चतिदुर्मेधाधृतिःसापार्थतामसी॥३५॥ सुखंत्विदानीत्रि
विधंशृणुमेभरतर्षभ॥ अभ्यासाद्रमतेयत्रदुःखांतंचनि
गच्छति॥३६॥ यत्तदग्रेविषमिवपरिणामेऽमृतोपमं

॥तत्सुखंसात्विकंप्रोक्तमात्मबुद्धिप्रसादजं॥३७॥ विषय
ेन्द्रियसंयोगाद्यत्तदग्रेऽमृतोपमं॥ परिणामेविषमि
वत्सुखंराजसंस्मृतं॥३८॥ यदग्रेचानुबंधेचसुखंमोह
नमात्मनः॥ निद्रालस्यप्रमादोत्थंतत्तामसमुदाहृतं॥३९
॥ नतदस्तिपृथिव्यांवादिविदेवेषुवापुनः॥ सत्वंप्रकृति
जैर्मुक्तंयदेभिःस्यात्त्रिभिर्गुणैः॥४०॥ ब्राह्मणक्षत्रियवि
शांशूद्राणांचपरंतप॥ कर्माणिप्रविभक्तानिस्वभावप्र

भवैगुणैः ॥४१॥ शमोदमः तपः शौचं क्षांतिरार्जवमेवच ॥
ज्ञानं विज्ञानमास्तिक्यं ब्रह्मकर्मस्वभावजं ॥४२॥ शौर्यं तेजो
धृतिर्दाक्ष्यं युद्धे चाप्यपलायनं ॥ दानमीश्वरभावश्च क्षात्रं
कर्मस्वभावजं ॥४३॥ कृषिगोरक्षवाणिज्यं वैश्यकर्मस्वभा
वजं ॥ परिचर्यात्मकं कर्म शूद्रस्यापि स्वभावजं ॥४४॥ स्वे स्वे
कर्मण्यभिरतः संसिद्धिं लभते नरः ॥ स्वकर्मनिरतः सिद्धिं
यथाविंदति तच्छृणु ॥४५॥ यतः प्रवृत्तिर्भूतानां येनस

र्वमिदं ततं ॥ स्वकर्मणा तमभ्यर्च्य सिद्धिं विंदति मा
नवः ॥४६॥ श्रेयान्स्वधर्मो विगुणः परधर्मात्स्वनुष्ठि
तात् ॥ स्वभावनियतं कर्म कुर्वन्नाप्नोति किल्बिषं ॥४७
॥ सहजं कर्म कौन्तेय सदोषमपि न त्यजेत् ॥ सर्वारंभा
हि दोषेणा धूमेनाग्निरिवावृताः ॥४८॥ असक्तबुद्धिः
सर्वत्र जितात्मा विगतस्पृहः ॥ नैष्कर्म्यसिद्धिं परमां सं
न्यासेनाधिगच्छति ॥४९॥ सिद्धिं प्राप्तो यथा ब्रह्म तथा

भगी ॥८८॥

ज्योतिर्निधमे॥ समासेनैवकौन्तेयनिष्ठाज्ञानस्यपरा
॥५०॥दुद्धाविशुद्धयायुक्तोधृत्यात्मानंनियम्यच॥श
ब्दादीन्विषयांस्त्यक्त्वारागद्वेषौव्युदस्यच॥५१॥विविक्त
सेवीलघ्वाशीयतवाक्कायमानसः॥ध्यानयोगपरो
नित्यंवैराग्यंसमुपाश्रितः॥५२॥अहंकारंबलंदर्पं
कामंक्रोधंपरिग्रहं॥विमुच्यनिर्ममशांतोब्रह्मभूया
यकल्पते॥५३॥ब्रह्मभूतःप्रसन्नात्मानशोचतिनकां

क्षति॥समःसर्वेषुभूतेषुमद्भक्तिंलभतेपरां॥५४॥भ
क्त्यामामभिजानातियावान्यश्चास्मितत्वः॥ततोमांतत्वतो
ज्ञात्वाविशतेतदनंतरं॥५५॥सर्वकर्माण्यपिसदाकुर्वा
णोमद्व्यपाश्रयः॥मत्प्रसादादवाप्नोतिशाश्वतंपदमव
यं॥५६॥चेतसासर्वकर्माणिमयिसन्न्यस्यमत्परः॥बुद्धि
योगमुपाश्रित्यमच्चित्तःसततंभव॥५७॥मच्चितःसर्व
दुर्गाणिमत्प्रसादात्तरिष्यसि॥अथचेत्वमहंकारान्न

ष्यसिविनंक्ष्यसि॥१८॥यदहंकारमाश्रित्यनयोत्स्य
इतिमन्यसे॥मिथ्यैषव्यवसायस्तेप्रकृतिस्त्वांनियोक्षति
॥१९॥स्वभावजेनकौन्तेयनिबद्धःस्वेनकर्मणा॥कर्तुंने
च्छसियन्मोहात्करिष्यस्यवशोपितत्॥९०॥ईश्वरःसर्व
भूतानांहृद्देशेर्जुनतिष्ठति॥भ्रामयन्सर्वभूतानियंत्रा
रूढानिमायया॥९१॥तमेवशरणंगच्छसर्वभावेनभा
रत॥तत्प्रसादात्परांशांतिंस्थानंप्राप्स्यसिशाश्वतं॥९

रम
॥८८॥

२॥इतितेज्ञानमाख्यातंगुह्याद्गुह्यतरंमया॥विमृश्यै
तदशेषेणयथेच्छसितथाकुरु॥९३॥सर्वगुह्यतमंभू
यःशृणुमेपरमंवचः॥इष्टोसिमेदृढमतिःततोव
क्ष्यामितेहितं॥९४॥मन्मनाभवमद्भक्तोमद्याजीमांन
मस्कुरु॥मामेवैष्यसिसत्यंतेप्रतिजानेप्रियोसिमे॥
९५॥सर्वधर्मान्परित्यज्यमामेकंशरणंव्रज॥अहंत्वां
सर्वपापेभ्योमोक्षयिष्यामिमाशुचः॥९६॥इदंतेना

भः गी ॥९०॥ यस्कायनाभस्कायकदाचन॥ नचाशुश्रूषवेवाच्यंन॥
मायोभ्यसूयते॥६३॥यइमंपरमंगुह्यमभक्तेष्वभिधास्य
ति॥भक्तिंमयिपरांकृत्वामामेवैष्यत्यसंशयः॥६८॥न॰
चतस्मान्मनुष्येषुकश्चिन्मेप्रियकृत्तमः॥भवितानचमे॰
तस्मादन्यःप्रियतरोभुवि॥६९॥अध्येष्यतेचयइमंध॰ एम
र्म्यसंवादमावयोः॥ज्ञानयज्ञेनतेनाहमिष्टःस्यामितिमे ॥९०॥
मतिः॥७०॥श्रद्धावाननसूयश्चशृणुयादपियोनरः॥

सोपिमुक्तःशुभाल्लोकान्प्राप्नुयात्पुण्यकर्मणां॥७१॥क
च्चिदेतच्छ्रुतंपार्थत्वयैकाग्रेणचेतसा॥कच्चिदज्ञानसं
मोहःप्रनष्टस्तेधनंजय॥७२॥अर्जुनउवाच॥नष्टोमो॰
हःस्मृतिर्लब्धात्वत्प्रसादान्मयाच्युत॥स्थितोस्मिगतसं
देहःकरिष्येवचनंतव॥७३॥संजयउवाच॥इत्यहं वा
सुदेवस्यपार्थस्यचमहात्मनः॥संवादमिममश्रौषम
द्भुतंरोमहर्षणं॥७४॥व्यासप्रसादाच्छ्रुतवानेत

महंपरं॥योगंयोगेश्वरात्कृत्नसाक्षात्कथयतास्व
यं॥राजन्संस्मृत्यसंस्मृत्यसंवादमिमम्॥केशवार्जुन
योःपुण्यंहृष्यामिचमुहुर्मुहुः॥२७॥तच्चसंस्मृत्यसंस्मृत्य
रूपमत्यद्भुतंहरेः॥विस्मयोमेमहान्राजन्हृष्यामिच
पुनःपुनः॥२७॥यत्रयोगेश्वरःकृष्णोयत्रपार्थोधनुर्धरः
॥तत्रश्रीर्विजयोभूतिर्ध्रुवानीतिर्मतिर्मम॥२८॥ ॥

इतिश्रीभगवद्गीतासूपनिषत्सुब्रह्मविद्यायांयोगशास्त्रे

श्रीकृष्णार्जुनसंवादेमोक्षसंन्यासयोगोनामाष्टादशो
ध्यायः॥ १८ ॥ ॥ ॐ ॥ ॥श्लोकंवाश्लोकार्द्धवा
पदंवायदक्षरंपठेत्॥स्मरन्भगवद्गीतासर्वपापैः
प्रमुच्यते॥१॥गीतागंगाचगायत्रीसीतासत्यापतिव्र
ताब्रह्मवल्लीत्रिसंध्यामुक्तिर्भवद्वेषिणी॥१॥
अर्द्धमात्राचिदानंदाभवघ्नीभ्रान्तिनाशिनी॥हेतुरा
त्रिपरानन्तातत्वार्थज्ञानमंजरी॥२॥इत्येतानिज

मनरोनिश्चलमानसः ॥ नानासिद्धिलभेच्छीघ्रंदेह
रमंयहं ॥ २ ॥ इतिश्रीगीतामाहात्म्यंशुभम् ॥ ॥
सम्वत् १९२३ साल मिति माघशुदी १४ रोज १ शुभ
म् ॥ ॥ ० ॥ ० ॥ ० ॥ ० ॥ ० ॥ ० ॥

रामम्

॥ ९२ ॥

31/10